॥ आख्यातशिरोमणिव्याख्यारत्नदेवी ॥

आ॰शि॰टी॰ १ श्रीगणेशाय नमः॥ प्रणम्य नीरदश्यामसुद्दामगुणमन्दिरं। आख्यातवादसद्व्याख्या रघुदेवेन तन्यते १ नैयायि
कः परमतं निराकर्तुं स्वमतं व्यवस्थापयति। आख्यातस्येति। यत्नो वाच्यः। यत्नत्वविशिष्टो वाच्यः। यत्नत्वं शक्य
तावच्छेदकमिति यावत्। यथाश्रुते यत्नस्य व्यापारान्तर्गतत्वेन व्यापारशक्तिवादिमते व्यवच्छेद्याप्रतीतेः। शक्य
तावच्छेदकं चाख्यातत्वं तच्च रूढिसंबंधेनाख्यातपदवत्त्वं। यदि च रूढिसंबंधेनाख्यातपदवत्त्वं लकारेष्वेवाक्ष
मिथुनान्तं तत्रैवाख्यातपदप्रयोगात्। तथा च पचन्ति सादावपि कृतिबोधापत्तिः। तत्रापि लकारस्थानेत्यादेशे
न रूढिसंबंधेनाख्यातपदवतो लकारस्य सत्त्वादिति विभाव्यते। तदा विशिष्यति स्वतन्त्र्वादिकमेव शक्ततावच्छेद
कं बोध्यं। एतेन दशलकारसाधारणं लत्वमेव शक्ततावच्छेदकमिति परास्तं। तस्य क्वाभावात्। भावे वा पचन्ति सा
दावपि कृतिबोधापत्तेरिति। तथा च यत्नत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नप्रतियोगितात्वावच्छिन्नविशेष्यक राम २

रूपसंबंधघटिताख्यातपदत्वत्वावच्छिन्ननिरूपितशक्तिविषयकज्ञानजन्ययत्नोपस्थितित्वेन हेतुत्वं कल्पनीय
मिति चेद्यत्नानुपस्थितिकार्यकारणभावकल्पनेऽपि शुद्धाख्यातपदाद् यत्नविषयकशाब्दबोधापत्तिरिति चेत्। संभ सत्यं
ति वस्येवं यदि पाकाद्यनुकूलयत्नविषयकशाब्दत्वावच्छिन्नं प्रति बाधि पदनिष्ठपचादिधात्वसमवहितोत्तरत्व
रूपानुपूर्वीज्ञानस्य हेतुत्वं न कल्प्यते। वस्तुतः शुद्धाख्यातपदजन्ययत्नोपस्थितिकाले पाको यत्नश्चेति निराकां
क्षवाक्यात्पाकानुकूलयत्नविषयकशाब्दबोधवारणाय तादृशकार्यकारणभावकल्पनायावश्यकत्वे
नानुपूर्वीताख्यातपदनिरूपितशक्तिज्ञानजन्ययत्नोपस्थितेः यत्नशाब्दबोधे जननीये पचतीत्याद्यानुपू
र्वीज्ञानस्य सहकारित्वकल्पनेनैव केवलाख्यातपदात् यत्नविषयकशाब्दबोधवारणसंभवात्। केचित्तु आ
ख्यातस्य यत्नवाचकत्वे पाकागोचरनिरुक्तसामग्र्ययत्नकाले चैत्रः पचतीति प्रयोगस्यायोग्यत्वापत्तिमुद्भावयन्ति।
तन्न श्रद्दधीमहि प्रहत्वभावातिरिक्तनिरुक्तसामग्र्ये मते मानाभावात्। वस्तुतस्तु निरुक्ताख्यातयत्नागोचरेपि न स

आ·त्रि·टी· तिः यत्नः पचतीतिवाक्यात् पाकानुकूलकृतेरेव ज्ञाह्यबोधोऽस्यापि निष्प्रसारमयत्नकाले पाकानुकूलकृतेरभा
२ वात्तदानीं तादृशप्रयोगस्य तथाविधभ्रमात्मकबोधाजनकतया । योग्यत्वरूपपयाहमेवेति । येन पदर्शितापु
मु त्तिभियाप्रवृत्तित्वमेवाख्यातपदशक्यतावच्छेदकं [redacted] पवर्णयंति । तेषां मते इष्टसाधनताज्ञानाहितस्यतावच्छे
दककोटिप्रविष्टत्वेन सिद्धायाः प्रवृत्तित्वजातेरीश्वरीयकृतिसाधारण्यात्वमानाभावे नेश्वरो वेदकर्त्तेतीतिवाक्या
च्छाब्दबोधानिर्वाहः परिचिंतनीयः । नवतन्त्राख्यातस्य कृतौ लक्षणायां नानुपपत्तिरितिवाच्यं । उपदर्शितरीत्याता
दृशवाक्यजन्यशाब्दबोधस्य शक्त्यैव निर्वाहे लक्षणाकल्पनाया अन्याय्यत्वात् नचाख्यातस्य यत्नत्वविशि
ष्टशक्तत्वे चैत्रः पचतीत्यादिवदीश्वरः पचतीति प्रयोगवारणाय यावद्रूपमाख्यातस्य प्रवृत्तित्वविशिष्टशक्तत्व
मुपगंतव्यमितिवाच्यं । आत्मा पचतीत्यादिप्रयोगवत्स्यापि वारणासंभवात् । तथाहि । आख्यातस्य यत्नत्व २

विशिष्टवाचकत्वे आत्मा पचतीत्यादिप्रयोगापत्तिरित्यत्र तथाविधप्रयोगशब्दार्थस्तथाविधशाब्दबोधो वा तथाविधजन्यशा
ब्दप्रमात्मकबोधो वा नाद्यः। कंठताल्वाभिघातरूपशब्दकारणासत्वेन तथाविधशब्दस्यापत्तेः। नांत्यः। तथाविधशा
ब्दबोधस्यापादकाभावात्। योग्यताज्ञानमेवापादकमिति तु नाशंकनीयं। यतस्तथाविधशाब्दबोधापत्तिप्रा
तादृशशाब्दबोधं प्रति तादृशायोग्यताज्ञानत्वेन हेतुत्वकल्पनस्य निष्प्रयोजनकत्वात्। ननु पाकानुकूलकृ
न्या तिमांश्चैत्र इत्यादिशाब्दबोधं प्रति तत्समौकारयोग्यताज्ञानस्य धर्मितावच्छेदकभेदेन हेतुत्वे गौरवात्। समान
धर्मि· तावच्छेदकताप्रत्यासत्त्यैव तथाविधयोग्यताज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावः। तथा च पाकानुकूल
कृतिप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दत्वावच्छिन्नं प्रति पाकानुकूलकृतिप्रकारता
निरूपितविशेष्यतावच्छेदकतासंबंधेन ज्ञानत्वेन हेतुत्वमिति योग्यताज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावे अवच्छे

श्री·त्रि· रीतेताद्दशसंबंधेन पाकानुकूलकृतिज्ञानस्यात्मत्वे सत्वात्तत्रताद्दशबोधापत्तौ क्रियमाणायां फलतः [redacted] नु पाका
२ कूलकृतिमानात्मेति शाब्दबोधापत्तिरिति तु मात्रा किञ्चाः। अवच्छेदकतासंबंधावच्छिन्नताद्दशकृतिप्रकारकशा
ब्दबोधं प्रति तथाविधयोग्यताज्ञानस्य हेतुतायाः कल्पनीयतया आत्मा पचतीत्यादौ विशेष्यदर्शिनां ताद्दशयोग्य
ताज्ञानविरहेण तथाविधभ्रमात्मकशाब्दबोधापत्तेरशक्यत्वात्। एवं चेश्वरः पचतीति वाक्यजन्यताद्दशबोधाप
त्तिवारणस्यापि सुलभत्वात्। न चैवं सति ईश्वरो वेदं करोतीति प्रयोगाद्बोधानुपपत्तिः। ईश्वरे अवच्छेदकतासंबंधे
न कृतेरभावादिति वाच्यं। तत्र समवायसंबंधेन ताद्दशकृतिप्रकारकबोधं प्रति तथाविधानुपूर्वीज्ञानस्य हेतु
त्वकल्पनात् ईश्वरः पचतीत्यादितः तथाविधशाब्दबोधस्यानुत्पादेन तथाकल्पनायाश्च संभवात् एवं च वस्तुतः आ राम
त्मा पचति ईश्वरः पचतीत्यादिवाक्यजन्यतथाविधबोधे योग्यतायत्तिमङ्गीकुर्वतां सतमधिकेनाननुगतत्वावि त्रि २

पचति पाकं करोतीति यत्नार्थककरोतिनामर्थो व्याख्यातस्यापि विवरणान्तर्व्यवहारादिबाधकं विना विवरणादपि

हे आख्यातपदस्य शक्तौ किं प्रमाणमत आह। पचतीत्यादि। किं करोतीति प्रश्नानंतरं क्रमेणोत्तरोषः। सर्वाख्यातवि
वरणादिति। इत्यालंकारिकाणां अर्थकथनादिति सर्थः। पूर्वोक्तरीत्या वाक्यस्योत्तरवाक्येनार्थकथनं विवरणमित्यस्य
नलक्षणत्वमिति भावः। ननु विवरणस्य कथं शक्तिग्राहकत्वं शब्दविधयानुमानविधया वा। नाद्यः। पाकं करो
तीतिवाक्यस्य पाकविषयककृतिमात्रबोधकत्वेन पचति आख्यातस्य कृतिबोधकतया तस्य शक्तिग्रहे शब्दविध
याप्रमाणत्वासंभवात्। नान्त्यः। साध्यहेतुप्रयोगासंभवादिति चेन्न। आख्यातपदं यत्नत्वविशिष्टशक्तं बा
धकं विना यत्नत्वविशिष्टार्थककरोतिप्रतिपादितार्थकत्वात्। पाकत्वविशिष्टशक्तपाकपदप्रतिपादि
तार्थकपच्धातुवत्। यद्यद्विशिष्टबोधकपदप्रतिपादितार्थकं तत्तद्विशिष्टे शक्तमिति सामान्यव्याप्त्या विवर
णस्यापि शक्तिग्राहकत्वसंभवात्। ननु उपदर्शितानुमानमप्रयोजकमत आह। व्यवहारादिवेति। बाधक

गृध्यात्मकुपयेः ॥

आ॰शि॰टी॰ विनाऽनुपलभ्यत्वप्रतिसंधानं विना। इदं तु धर्मिणि। आख्यातस्य शक्तिमवच्छेदार्थमुक्तं। कुतस्त्वेरिति। शक्तिग्र
४ हसंभवादित्यर्थः। तथा च विवरणहेतुकानुमानस्य शक्यग्राहकत्वे तु लभ्यमुक्त्या व्यवहारहेतुकानुमानस्यापि
शक्यग्राहकतया घटत्वादिविशिष्टे घटपदादेरपि शक्तिर्विलोपप्रसंग इति भावः। ननु विवरणात् तत्रैव शक्तिग्राहकं
यत्र नानुपलभ्यत्वप्रतिसंधानवत्तो। प्रकृते तु पाकः यत्नजन्यः पाकत्वादित्यनुमानादपि यत्नस्य लाभसंभवे
नानुपलभ्यत्वात्। अनुपलभ्यस्य आख्यातपदशक्यत्वे किमपराद्धं धर्मिणो यत्नस्य तत्राह। किं करोतीत्यादि। यत्न
प्रश्ने। यत्नत्वविशिष्टे जिज्ञासितसंबंधबोधकत्वाद् प्रयोगे। पचतीत्युत्तरस्य। उत्तरकालभावि पचतीति वा
क्येऽपदर्शितप्रश्ननिवर्तकत्वस्य। यत्नार्थकत्वं विना। यत्नत्वविशिष्टे पाकसंबंधबोधं विना। असंभवः। य
[illegible]विशिष्टे यत्कर्मावच्छिन्नस्य संबंधः यत्प्रश्नवाक्यात् प्रतीयते तत्कर्मविशिष्टे तत्कर्मसाध्यधर्मावच्छिन्नसं राम ४

किं करोतीतियत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनाऽनुपपत्तेश्च॥

स्त

बंधबोधं ... उत्तरवाक्यात्प्रतीयते तत्र हि तदुत्तरवाक्यं तत्प्रश्ननिवर्तकं भवति। यथा घटत्वविशिष्टे जिज्ञासित संबंध
बोधके कस्माद्घट इति प्रश्ने घटत्वविशिष्टे दंडजन्यत्वबोधकदंडाद्घट इत्युत्तरवाक्यं निवर्तकं। प्रकृते चाख्या
तस्य यत्नत्वविशिष्टावाचकत्वे व्यापारस्य पचतीति वाक्यात्पाकानुकूलव्यापारबोधाभ्युपगमे य
त्नत्वविशिष्टे पाकसंबंधबोधाभावात्तद्वाक्यस्य यत्नत्वविशिष्टे जिज्ञासित संबंधबोधकं किं करोतीति
प्रश्नवाक्यनिवर्तकत्वानुपपत्तेः। अन्यलभ्यत्वेपि आख्यातस्य यत्नत्वविशिष्टे शक्तिरावश्यकी। न तु र
थो गच्छतीत्यादौ आख्यातस्य यत्नबोधकत्वासंभवेन व्यापारे शक्तिरावश्यकीत्यत आह। अचेतनर
ति। अचेतनार्थमुख्यविशेष्यकबोधजनकवाक्ये इत्यर्थः। अनुकूलव्यापार इति। अत्रानुकूलत्वोक्ती
र्तनं तु गमनस्य तेन संबंधेन व्यापारेन्वयस्यौपगम्याय। न तु तदंतर्भावेनापि लक्षणीयत्वात्। व्यर्थत्वात्। तत्र

अचेतनरथो गच्छतीत्यादौ चानुकूलव्यापारे लक्षणेति प्राञ्चः =

अन्यदीयगमनानुकूलनोदनादिमति गच्छतीत्यप्रयोगात् । रथो गच्छति जानाति इच्छति यतते द्वेष्टि वि

श्री गौरी । गमनस्यान्वये पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधात् । तत्र व्यापारे लक्षणया वादिम

५ तं दूषयति । अन्यदीयेति । रथगमनानुकूलनोदनाख्यसंयोगादिमति निश्चलपुरुषे ऽयं पुरुषो गच्छती

त्यप्रयोगादित्यर्थः । तथा च धात्वर्थस्य व्यापारवादिमते तादृशातिनिश्चलपुरुषेपि गमनानुकूलनोदनाख्य

संयोगादिरूपव्यापारवत्तया पुरुषो गच्छतीत्यादिप्रयोगापत्तिरिति भावः । ननु तादृशपुरुषे तादृशवि

धप्रयोगापत्तिर्नोमतत्वाद्विधवाक्यजन्यप्रमात्मकबोधापत्तिः । सा च तादृशपुरुषस्य निश्चलत्वादि

ज्ञानदशायां व्युत्पत्तेः न तदा वा से इष्टापत्तेः । आद्ये तत्कालीनभावेन तादृशशाब्दबोधाप्रसिद्ध्या त्वाप्रयत्नस

म्भवः इत्यत आह । रथो गच्छतीत्यादि । केचित्तु सामानाधिकरण्यसंबन्धेन वर्तमानगमनविशिष्टे व्यापा राम

श्यो रे आख्यातस्य लक्षणाकल्पनान्नोपदर्शितापत्तिरित्यत आह । गच्छतीत्यादीत्याहुः । कृतिव्यापारयो ५

क्रियानुकूल [illegible] कृतिव्यापारयोरप्रतीतेः ॥

सादि। क्वचित्कृतिबाधे व्यापारलक्षणाकल्पनागौरवात्। क्वचित्कृतिव्यापारयोर्बाधेन कृतिव्यापार
ना योः प्रतीत्यसंभवादित्यर्थः। ननु ज्ञानातीत्यादावाश्रयत्वेऽव्याप्तस्य लक्षणाकल्पने चैत्रो घटं जाना
टी तीतिप्रयोगकाले घ ज्ञानवृत्तिमैत्रे मैत्रो घटं जानातीतिप्रयोगापत्तिः। एककालीनत्वस्य वधाव
च्छिन्नतदाश्रयत्वस्य तदानीं मैत्रेऽपि सत्त्वात्। तत्तत्स्वावधावच्छिन्नाश्रयत्वे लक्षणाकल्पने पुनरती समवाय =
१५ वगौरवात्। तदपेक्षया व्यापारे लक्षणाकल्पनमेव न्याय्यो ऽतिप्रसंगस्य तत्पदार्थान्तरीयत्वावारणीय
त्वात्। यद्वा व्याप्तं तस्याश्रयत्वत्वेनाश्रयत्वसामान्ये लक्षणा ज्ञानातीत्यादौ चाश्रयत्वत्वेन रू
पेण समवायसंबंधावच्छिन्नाश्रयत्वस्यैवावबोधात्तथैव कार्यकारणभावकल्पनात्। तथापि व्या
पारलक्षणायेक्षया गौरवापत्तेरसंतत्वाह। गत्यादिमत्त्वेति। आदिना ज्ञानादिपरिग्रहः। मात्रपदेन

= गत्यादिमत्वमात्रप्रतीतिश्च॥

श्री·शि·टी· स्वायारमवच्छेदः। तथा चानुभवानुरोधेनागत्या तत्तत्संबंधावच्छिन्नाश्रयत्वे लक्षणाणि तथाविधगुरुतरका
६ र्यकारणभावो वा कल्प्यत इति भावः। केचित्तु। ननु उपरञ्जितस्थलेषु आधारस्येवाश्रयत्वस्याप्यप्रती
तेरलं तत्र लक्षणाये सत्यत आह। गत्या हि मत्वेती त्याहुः। ननु आरम्भातस्यमुख्यार्थबाधस्थले सर्वत्रा
श्रयत्वे लक्षणा कल्पनं न संभवति। घटे न त्रपतीत्यादौ नतीलसंभवात्। घटस्य न त्वेन ना
णाश्रयत्वाभावात्। प्रतियोगिना संबंधेन नाश्रयत्वा वच्छिन्नप्रतिप्रतियोगिनस्वादान्यसंबंधे
न हेतुत्वानुरोधेन तद्दृश्यापि प्रतियोगिता संबंधेन नाश्रयत्वागीकारे पुनर्लाघवात्प्रतियोगि
त्व एव लक्षणा कल्पनस्यैवोचितत्वादित्यत आह। न त्रपतीत्यादावपि। निरूढेति। अन्तादि सिद्धे राम
स्यार्थः। ननु परञ्जितवद्भूप्रयोगसत्वे तत्र शक्तिरेव किमिति न कल्प्यत इति चेन्नापत्वत्वरूपल ६

आश्रयत्वेन श्यतीत्यादौ प्रतियोगित्वे निरूढलक्षणा॥

धुत्वाकारतावच्छेदकसंभवेन तत्तत्संबंधघटितताश्रयत्वत्वावच्छिन्ने शक्तिकल्पने गौरवात् तानरूपप्रति
बंधकस्य दत्तजलाञ्जलिः प्रसज्येत। नवाश्रयत्वत्वस्यातिरिक्तत्वमुपेत्य तदवच्छिन्ने शक्तिकल्पने
बाधकाभाव इति वाच्यं। तर्हि आधारत्वमप्यतिरिक्तमभ्युपेत्य तदवच्छिन्ने शक्तिकल्पनस्यौचित
त्वात्। न चेष्टापत्तिः। तथा सति विनिगमकाभावात्। अनंततत्तद्धर्मावच्छिन्ने शक्तिकल्पनाम
पेक्ष्य लाघवात् कृत्स्नयत्नत्वावच्छिन्ने एवाख्यातस्य शक्तिकल्पने बाधकाभावात्। एतेन सम
वायत्वमतिरिक्तं स्वीकृत्य तदवच्छिन्ने आख्यातस्य शक्तिः। अन्यत्र लक्षणेत्य[illegible]पास्तं। उपदर्शित
विनिगमनाविरहेण तत्तद्धर्मावच्छिन्ने शक्तिकल्पनाप्रयुक्तगौरवस्य जागरूकत्वादित्यस
ध्दिकमग्रेव स्फुटमः। ननु चैत्रो जानातीत्यादौ आश्रयत्वे निरूढलक्षणाकल्पनं निरर्थकमेव। तत्रा

तंडुलः पचति चैत्रः। मैत्रः पच्यते तंडुल इत्यन्वयाबोधेन धात्वर्थप्रातिपदिकार्थयोरभेदेन साक्षादन्वय

ग्रा॰ शि॰ १ ७ मैत्रः पच्य

अयतासंबंधेन चैत्रे ज्ञानरूपधात्वर्थस्यान्वये नैवोपदर्शितान्वयबोधोपपत्तेः। तत्राश्रयत्वप्रकारका
नुभवस्य सिद्ध एवेति किं नामार्थकाभाते दूषणमाह। चैत्रः पचतीत्यादि। अन्वयाबोधादिति। चैत्रः पचति तं
डुलं इत्यादौ कर्मतासंबंधेन पाके तंडुलस्य। [redacted] ति तंडुल इत्यत्र पाके कर्तृतासंबंधेन मैत्रस्यान्वया
ननुभवादित्यर्थः। धात्वर्थप्रातिपदिकार्थयोरित्यादि। धात्वर्थनामार्थयोरभेदातिरिक्तसाक्षात्संबं
धेनान्वयबोधस्याव्युत्पन्नत्वेत्यर्थः। अत्र लोके पचतीत्यादौ अभेदसंबंधेन धात्वर्थे नामार्थलो
कस्यान्वयात् व्युत्पत्तिभंगः। अतोऽभेदातिरिक्तेति [redacted] ननु तत्र विशेषणविभक्तेरेव अभेदो
र्थः। तत्रैव वचस्तो कस्यान्वयोऽभ्युपेयते। तथा च तत्राभेदातिरिक्तत्वविशेषणानुपादानेपि न दोषम राम

बोधस्याव्युत्पन्नतया संबंधविधया तद्भानस्यासंभवादिति तु नव्याः॥

नामार्थप्रत्ययार्थयोरेवान्वयबोधस्य तत्रोत्पन्नत्वादिति चेत् सुप्तिङ्विशेषणविभक्तेः साधुत्वेनाभेदार्थ
कत्वासंभवात् तस्मादभेदार्थकत्वेपि तु सविभक्तेर् [illegible] नुसंधानं [illegible] स्तोकं पाकं इत्यादावभेदसंबंधेन विना
पाके स्तोकान्वयबोधस्यानुभवसिद्धत्वात् तत्रैवाभेदातिरिक्तत्वविशेषणत्वाप्रवृत्तिदानुसंभवात् तत्र तु स
विभक्तेरनुसंधानं विना शाब्दबोधानंगीकारे गतराजपुरुषः इत्यादौ राजपदस्य राजसंबंधिनि लक्षणया
यत्त्रापि तथाव्युत्पत्तिशक्त्यादिरिति तंडुलं पचति इत्यादौ पाके तंडुलकर्मत्वस्यैव कर्मतासंबंधेन तंडुलस्या
पि बोधस्यात्तत्रानुपपत्तिभंगप्रसंगवारणाय सार्थक्यादिति नामार्थधात्वर्थयोरन्वितविभक्त्यर्थोऽतिरि
क्तेः स्यर्थः ननु तथापि नकलंजं भक्षयेदित्यत्र विध्यर्थबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वान्वित

आ॰ती॰टी॰ ६

नञर्थाभावस्य धात्वर्थे कालेऽन्वयभ्रमणाद्वाक्यपात्तत्रैव वक्तुमुचितं भ्रमापरिहारात् ॥ अत्र कश्चिदिति चेन्निपातानामिति र्क्तत्वं
विशेषणीयं । स्वीकुरुतां वा नञ्पदस्याभाववति लक्षणा । तस्मात्र भेदसंबंधेन तत्र धात्वर्थे ऽन्वय इति । संबंधम
र्यादयेत्यादि । चैत्रो जानातीत्यादौ धात्वर्थनामार्थयोः समसमर्यादया आश्रयत्वस्य भानात्समवादिसंबंधः त
थात्वे तादृशाप्युल्लासत्वरोधेन नामार्थनिष्ठत्वभेदानिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छे
दकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हे
तुत्वं कल्पनीयं । एवं धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छि
न्नं प्रत्यपीति न चैत्रो जानातीत्यादौ आश्रयतासंबंधेन धात्वर्थे ज्ञानस्य नामार्थेऽन्वयबोधसंभव इति भावः ॥
अत्र चिंतामणिकारमतानुयायिनः । चैत्रः पचति तंडुलमित्यादौ कर्मतासंबंधेन तंडुलस्य पाकेऽन्वयबोध

राम ६

वारणायनामार्थनिष्ठतया विषयप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन ज्ञानं बुद्धित्वावच्छिन्नं प्रतिविम
त्ति पदवृत्तिनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वकल्पनमनु। धात्वर्थनिष्ठप्रकारतानिरूपितवि
शेष्यतावच्छेदकतासंबंधेन ज्ञानं बुद्धित्वावच्छिन्नं प्रतितथा विशेषपक्षेऽपि तु तत्वकल्पनं तु निष्प्रमाणिकं तथा
व नादृष्टमी म। तथाप्येवं ज्ञानानां साधुत्वाश्रयतासंबंधेन धात्वर्थस्य नामार्थेऽन्वयबोधे बाधकाभावादाश्रय
लेशाररव्यानस्यापि हृदयहत्तल्लभ्रमणकल्पनेति किमिति न जानीमहे। नन्वाख्यातस्याश्रयत्वे लक्षणा न गौ कारेज्ञानानी
स्याद्वाश्रयत्वप्रकारकबोधानुभवाय लक्षणा यद्यपि चेन्न। प्रायः स्वभावानुभवबलाज्जयाना धकसूक्ष्मवयसी
स्यात्कुः। अत्र विवृतं तेव हवः। ज्ञानानीत्यादावाख्यातस्य घटादेः पारसिकलक्षणाज्ञानकाले स्तानौ योग्यता
दिरिति शाब्दबोधोपपत्तये घटादिविशेष्यकत्वानप्रकारकेबुद्धित्वावच्छिन्नं प्रतिज्ञाधातुसमभिव्या ख्या

आ॰टी॰टी
६

ख्यातपदजन्यघटाद्युपस्थितेर्हेतुत्वकल्पने घटत्वपटत्वादिभेदेनानन्तकार्यकारणभावकल्पनापत्त्या गौरवात्तदपेक्ष्य
तदनिर्वचनीयज्ञानत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति आख्यातपदनिरूपित पित
वृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वकल्पनैव न्याय्यसी। तथा च तादृशशाब्दप्रकारताभावान्न चैत्रो
जानातीत्यादौ आश्रयतासंबंधेन चैत्रे ज्ञानाद्यन्वय इति न आख्यातस्याश्रयत्वे लक्षणावश्यकीति। यत्तु घट
त्वपटत्वादिना नैवंरूपतथाविधकार्यकारणभावकल्पने ज्ञानी यो घट इति योग्यताज्ञानबलात्तथाविधाख्या
तपदज्ञानजन्यघटाद्युपस्थितेर्ज्ञाने ज्ञानी यो घट इति शाब्दबोधस्य समवायसंबंधेनापत्तिर्दुर्वारा। यदि
च विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या शाब्दबुद्धियोग्यताज्ञानयोरपि कार्यकारणभावः। तथापि भिन्नविषयकानु
मितिसामग्र्यभावरूपकारणबलात्तथाविधशाब्दबोधापत्तेरत्यन्तनिर्बलत्वादिति समाधेयमिति सर्वत्र यथा घटत्व एम
६

परत्वादिकं निवेश्य तथाविधसमूहालम्बनज्ञानजन्योपस्थितिशाब्दबोधयोः कार्यकारणभावकल्पनमि
ति किं बाधकं चैत्रो जानातीत्यादौ चैत्रे आश्रयतासंबंधेन ज्ञानस्यान्वय इति । तन्न । उपदर्शितशाब्दबोधप्र
जन्योपस्थितेर्विषयभेदेन कार्यकारणभावकल्पनेन तत्तद्विषयकत्वैः सह विनिगमनाविरहेण कार्यकार
णभावानन्त्यात् । कारणतावच्छेदककोटौ बाह्यतादृशोपस्थितिघटत्वादिवृत्तिविषयतासंबन्धेन ज्ञानत्वावच्छि
न्नं प्रति घटत्वादिवृत्तिविषयतासंबन्धेन ज्ञानत्वेन हेतुत्वान्तरकल्पनस्य सम्यक्तया आवश्यकत्वाभावात् । तान
था हि । विरोधिसामग्र्यभावेन ज्ञानीयो घट इति शाब्दबोधजननीयेत्याधानुसमभिव्याहृततात्पर्यकत्व
न्योपस्थितिः विशिष्टघटत्वप्रकारकज्ञानादेः सहकारित्वकल्पनीयो घटत्वप्रकारकज्ञानेन तथाविधोप
स्थितिविशिष्टस्य चमत्कारतासंबन्धेन यस्याधिकरणतानिरूपितविषयतासंबन्धावच्छिन्ना वृत्तित्वरूपसा

आ॰ती॰टी॰ मानाधिकरण्यसंबंधेन। तथा च तादृशगृहीतपदज्ञानजन्यपदार्थोपस्थितिकाले तथाविधसामानाधिकर
१० ण्यसंबंधेन तादृशगृहीतपदज्ञानजन्योपस्थितिविशिष्टं यत्र घटत्वज्ञानं तत्स्वरूपं कार्य[ ]भावेन विरो सह
धिसामग्र्यभावरूपकारणबलात्तन आत्मनि ज्ञानी यो घट इति शाब्दबोधापत्तिः न च तथापि पुरुषांतरस्य गृहीता
तपदज्ञानजन्यपदार्थोपस्थितिकाले पुरुषान्तरात्मनि विरोधिसामग्र्यभावरूपकारणबलात् ज्ञानी यो घट इ
ति शाब्दबोधापत्तिर्दुर्वारैवेति वाच्यं। एकात्मसमवेतस्यान्यात्मनि आपत्तिवारणार्थं तदात्मसमवेतत्वावच्छिन्नं
प्रति तादात्म्यसंबंधेन तत्[ ]दात्मत्वेनापि हेतुत्वावश्यकत्वात् तत्तत्पुरुषीयोपदर्शिता गृहीतपदज्ञानजन्यो
पस्थितिविशिष्टतत्तत्पुरुषीयघटत्वज्ञानत्वावच्छिन्नविशिष्टतदात्मविशिष्टविरोधिसामग्र्यभावस्य ज्ञानी
यो घट इति शाब्दबोधसामग्रीत्वाभ्युपगमे न कथमप्यनुपपत्तिभावात्। घटत्वज्ञानत्वावच्छिन्नवैशिष्ट्यं च तत्त राम
१०

दात्मनि एककालीनत्वसंबंधेन विरोधिसामग्र्यभावेन तत्तदात्मवैशिष्ट्याशिष्टं स्वतादात्म्यविशेषो यगतो
भयघटितसामानाधिकरण्यसंबंधेन बोध्यतयावच्छिन्नत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताव
च्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नप्रतिप्रकारतासंबंधेन तथाविधार्थस्यात्पदजन्योपस्थितेर्हे
तुत्वस्य निर्दुष्टतया नादृशहेत्वभावात् चैत्रो ज्ञानानीतासादौ चैत्रे आश्रयतासंबंधेन ज्ञानान्वयबोधाप्र
संगेन तत्रारण्यातस्याश्रयत्वे लक्षणाविरहपकीर्तिसंगे। केचित्तु। चैत्रो ज्ञानानीतासादौ चैत्रे आश्रयता
संबंधेन ज्ञानान्वयानुपगमे प्रसिद्धितमाख्यातस्य लक्षणातस्यापि चैत्रः पृच्छतीत्यादावपि स्वानुकूलकृ
तिमत्त्वसंबंधेन चैत्रे धात्वर्थान्वयबोधस्यैव समुचितत्वात्। यदि वधात्वर्थस्य नामार्थेऽन्वयबोधोऽप्र
सिद्ध इति तथाविधबोधस्यासंभवेनाख्यातस्य लक्षणाशक्तिरावश्यकीति विभाव्यते। तदाज्ञानानीतासादाव

कृत्याश्रयत्वाभिधायकत्वं। क्रियाजन्यत्वप्रतिसंधानाविशेषेपि यत्नजन्यत्वाजन्यत्वप्रतिसंधानाभ्यां

आ.शि.टी. पिश्चाश्रयत्वेलक्षणाकल्पनमावश्यकमित्याकूतः ननु पर्वतीन विवरणादिखिलादौ व्यापारस्य यत्नवाचकत्वे
२१ तदेवायाति। यदि हि कृञो यत्नार्थकत्वं न देवत्तु कुतस्तस्य व्यापारत्वविशिष्टेशक्तिकल्पने बाधकाभावात् इत्य
तआह कृञश्चेत्यादि। क्रियाजन्यत्वेति। संयोगरूपव्यापारजन्यत्वप्रतिसंधानाविशेषेपीत्यर्थः। तथा च कृ
धातोर्व्यापारार्थकत्वे घटांकुरादौ व्यापारजन्यत्वप्रतिसंधानकाले कृतिजन्यत्वप्रतिसंधानाप्रतिसंधा
नाभ्यां घटः कृतः अंकुरो न कृत इति व्यवहारः सर्वानुभवसिद्धो न स्यात्। तन्मते तदांकुरे व्यापारजन्य
त्वज्ञानसत्वेन व्यापारजन्यत्वरूपकृतत्वव्यवहर्तव्यताज्ञाना भावादिति भावः। कृधातोर्यत्नार्थकत्वे मुख्यन
रमाह। ज्ञानादिवदिति। ज्ञाताइत्यादौ यथाश्रयत्वबोधकत्वपदसमभिव्याहृतेपदान् ज्ञानाश्रय
त्वेत्र इति बोधस्तद्वत्कर्तृरसत्रापि आश्रयबोधकतत्वपदसमभिव्याहृत तद्धातुपदात् तदाश्रय इति राम २१

ज्ञानादिवदाश्रयपरत्रिडंतकर्तृपदस्य कृत्याश्रयबोधकत्वसंभवात् = ज्ञाधातु २

[illegible]

बोधकत्वमघटं। स च कृधातोर्यत्नार्थकत्वं विना न संभवतीति तस्य यत्नार्थकत्वमावश्यकमिति भावः॥ इद
मत्र बोध्यं। तज्जारिपुरुषस्य कर्तृत्वेऽपि चैत्रस्याक्तिः न केवलाघवात्तज्जारिपुरुषस्य कृतनौत्राक्तिरंगीक्रियत इति वा
च्यं। तथा सति पत्न्या चैत्रः इत्यादौ चैत्रेत्वपदार्थकृतेः समवायसंबंधेनान्वयबोधासंभवात्। नामार्थ
धात्वर्थयोरिव नामार्थयोरपि अभेदातिरिक्तसंबंधेनान्वयबोधस्याव्युत्पन्नत्वात्। अन्यथा घटः कर्म
त्वमित्यादि निराकांक्षवाक्यादपि कर्मतायामाधेयतासंबंधेन घटान्वयबोधप्रसंगात्। अत्र तत्र चैत्रनाम
त्वेनास्तीति तु न संभावनीयं। स्वाधेयत्वेन तस्यापि नामत्वात्। तदाकृष्टमिश्रयुक्ताः स्वाधेयत्वमिह नामेष्ट
मित्यादि। ज्ञातादिस्सादौ तु कृते तौ नानुकूलत्वाभावेन ज्ञानानुकूलकृत्याश्रयबोधासंभवात्। सविषय
कधातुसमभिव्याहारस्थले तव आश्रयत्वे लक्षणाऽऽवश्यकीति। ननु ज्ञाता इत्यादौ तद्बोधलक्षणायाम्

क्रियायाः क्रियानुकूलव्यापारस्य वा कृत्स्नार्थे चेत् क्रियाश्रयः कारकमात्रं वा कर्तृपदस्यार्थः स्यात्॥

श्रा॰शि॰शि॰ कारेपि कर्तृत्वव्यवहारः शक्त्यैव कर्तृसाश्रयबोधोस्तु किं धातोर्यत्नार्थत्वाद इति चेन्न। तथा सति कर्तृसत्त्व धातुवैय
१२ र्थ्यापत्तेः। तस्यैव यत्नेव्यापारानुकूलकर्तृसाश्रय इति बोधापत्तेश्च। नवत तत्र हि धातुपदं तात्पर्यग्राहकमिति
स्व वाच्यं। प्र[redacted] कृत्यर्थान्वित स्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेरिति। ननु कर्तृपदात् कर्तृसाश्रयबोध इष्टो न
भवति तर्हि वृक्षो यत्नार्थकत्वमायाति तदेवन। तस्मात् क्रियाश्रयस्य तदनुकूलव्यापाराश्रयबोधस्ये
पे वांगीकारादित्यतस्त्वाह। क्रियायाइत्यादि। कृधातोः क्रियार्थकत्वमभ्युपेत्य कर्तृपदात् क्रियाश्रयबोधांगी
कारे क्रियाश्रयमात्रे कर्तृव्यवहारः स्यात्। न स्यात् क्रियानुकूलव्यापारार्थकत्वमभ्युपेत्य कर्तृपदात्तादृ
क शव्यापाराश्रयबोधांगीकारे च कारकमात्रे च कर्तृव्यवहारः स्यात्। कारकमात्रस्यैव तथाविधव्यापारा राम
श्रयत्वादिति भावः। कृञो व्यापारवाचित्वादिमीमांसकमतमपि दूषयति। अंकुरः कृत इति प्रयो १२

ग स्य स्योगकृतिगमनं करोतीति बीजादिनांकुरः कृत इति विनापि यत्नं कृत्रः प्रयोगान्नतस्य यत्नवा
चकत्वं॥

कर्त्तृपदे च कृञः फलेनिरूढलक्षणायदि कृञो व्याश्रयमात्रेन तत्प्रयोगः

गस्य कर्तृत्वे यत्नार्थकत्वेपि ईश्वरीयकृतिमादाय संभवेन तस्य व्यापाराश्रयतासाधकत्वायोगात् आह वीजा
दिनेति तथा च कर्तृ व्यापारार्थकत्वं विना वीजादिकरणकव्यापारजन्य अंकुर इति वोधजनकस्य वीजा
दिनांकुरः कृत इति प्रयोगस्यासंभवात्तस्य तदभिधायकत्वमावश्यकमिति भावः ननु तथा सति कार
कमात्रे कर्तृत्वव्यवहारः आपद्येत तत्राह कर्तृपदे चेति अत्र च षष्ठ्यर्थे सप्तमीति स्याश्च घटकत्व
मर्थः । पदपदे चवाक्यपरं । तथा च कर्तृरूपवाक्यघटकस्य कृञ इत्यर्थः । यदीति । वस्तुतः कारकमात्रस्य
कर्तृपदार्थत्वे क्षतिविरहः । विवक्षातः कारकाणि भवंतीति न्यायात् किं च मुख्यतोरे वाप्ति प्रसंगभंगत्वादिति
भावः ननु कृधातोरनंतस्पोग विभागरूपव्यापारवाचकत्वापेक्षया लाघवात् यत्नेवाचकत्वमेवोचितं
उपदर्शितस्थले च व्यापारे लक्षणा गौकारान्नानुपपत्तिरिति चेन्न । वस्तुतः स्थले चुतयो[illegible]योगाभावे नत
प्र

एवं चाचेतनेऽपि पचतीति प्रयोगात् कृञानुकूलव्यापारप्रतीतिर्बाधकं विना गौणत्वायोगात् जनकव्यापार एवा

आ॰ शि॰ १॰ त्रशक्तिग्राहकाभावात्। अन्यथा घट इत्यत्र भ्रमायां कदाचित् घटबोधसंभवेन तस्यापि तत्र शक्तिकल्पना
१२ स्यादिति न किंचिदेतत्। कृधातोर्व्यापार एव च कर्तृत्वमवस्थाप्याख्यातस्यापि तद्वाचकत्वमवस्थापयति।
एवं चेति। कृधातोर्व्यापारशक्तत्वे करोतीति विवरणादेर्यत्नत्वविशिष्टे आख्यातपदशक्तिकल्प
नत्वाभावे चेत्यर्थः। अचेतनेऽपीति। काष्ठादावपीत्यर्थः। बाधकं विनेति। व्यापारे आख्यातस्य शक्तिकल्प
नेन बाधकं विनेत्यर्थः। गौणत्वायोगादिति। व्यापारे आख्यातस्य लक्षणाकल्पनायामन्याय्यत्वादित्यर्थः।
जनकव्यापारेति शक्यतावच्छेदककोटौ जनकत्वांशनिवेशस्तु पचतीत्यादिवाक्यजन्यशाब्दबोधे ज
नकत्वस्य प्रकारविधया भानानुभवाभिप्रायेणेत्यर्थ इति। आख्यातपदार्थ इत्यर्थः। नन्वत्र जनक
त्वमपेक्ष्य पूर्वकालवृत्तित्वमात्रं शक्यतावच्छेदककोटौ निवेशनीयं लाघवादित्यत आह तण्डुलेति। तथा चा १२
ख्यातार्थः। तण्डुलक्रयणादेरपि पाकादिजनकत्वमिति नातिप्रसंगः॥

कथं तर्हि पचतीत्यत्र पाकजनकयत्नानुभवद्वृत्तित्वेन यत्नाविनाभूतपाकादिना क्रियाविशेषेणाकारणस्य यत्न

पदर्शितापत्तिवारणार्थं युक्तत्वेपि अनन्यगतिकतया अनन्यथासिद्धमिति यत्नप्रवृत्तिहेतुत्वरूपजनकत्वस्यैव
आख्यातपदशक्यतावच्छेदककोटौ निवेशनमुचितमिति भावः नर्हीति। आख्यातस्य यत्नत्वविशिष्टवा
चकत्वे इत्यर्थः यत्नाविनाभूते साध्ये यत्नजन्यत्वव्याप्यो यः पाकादिक्रियाविशेषः तेन हेतुना तत्
त्वारणीभूतयत्नानुमानादित्यर्थः अत्र पाकादिक्रियाहेतुत्वोक्तौ तेन तत्तादात्म्यमवृक्षस्य व्याप्यता
घटकत्वमभ्युपेयं तथा च पाकादिः यत्नजन्यः पाकादिस्त्वनुमानात् साके यत्नजन्यत्वसिद्धिः कालेतुल्य
विशिष्टे घटतया यत्नेपि पाकजनकत्वसिद्ध्या पचतीत्यादौ पाकजनकयत्नानुभववृत्तिनिर्वाह इति भावः।
ननु आख्यातस्य व्यापारवाचकत्वे पचतीत्यनन्तरं पाकजनकयत्नवानिति विवरणप्रसंगाभिरिसत आह।
पचतीति। तात्पर्यविवरणमिति। तात्पर्यविषयीभूतार्थविवरणमित्यर्थः न च यादृशवाक्यस्थपदात् या

स्यानुमानात्· पचतीति पाकजनक यत्नवानिति तु तात्पर्यविवरणं·

अन्यथाधर्मिणोपिवाच्यतापत्तेः अथैवंतत्रोपदर्शितानुमानेनयत्नानुभवनिर्वाहेपियत्नस्यवर्ज्जमानत्वेन
प्रतीयेत॰ तस्यापदार्थत्वात्॰

श्रा॰री॰शे॰ किलश्रवणान्यतररूपवृत्त्यायाद्धगार्थवोधःस्याण्वतस्यतात्पर्यविषयीभूतःनप्रकृतेचपचतीत्यादिवाक्य घट
१४ कीभूतपदार्थसायत्नावोधेकथंतत्रनतात्पर्यविषयत्वमितिवाच्यं।धूमोस्तीतिवाक्यस्यतत्प्रयोज्यास्यौवि नुमिति
षयीभूतवह्नितात्पर्यकत्ववत्पचतीत्यादिवाक्यस्यापितत्प्रयोज्यानुमितिविषयीभूतयत्नतात्पर्यकत्व
संभवात्।तात्पर्यंचअस्माद्वाक्यादेतदर्थवोधोभवत्वितिसादिवाक्येनाभिलप्यमानाएतद्वाक्यप्रयोज्यत्वप्र
कारकतदर्थवोधोस्तीच्छा।ननुविवरणस्यपुरःपरतात्पर्यविषयीभूतार्थपरत्वकल्पनेसर्वत्रतथासंभवे
ल नशक्तिग्राहकंमनुपपन्नंस्यादतआहअन्यथेति।अन्यलभ्यार्थस्यापिविवरणेच्छाकल्पनेइत्यर्थः।त
थाचयत्रान्यलभ्यत्वंनास्तितत्रैवविवरणस्यशक्तिग्राहकत्वमायास्यतीतिभावः।एवमिति।तत्रोपदर्शि
तानुमानेनपाकजनकयत्नानुभवनिर्वाहेपीत्यर्थः।यत्नस्येति।पाकज नकयत्नस्येत्यर्थः।ननुअनुमाना एम
१४

अन्यत्र धात्वर्थक्रियायां स्वार्थव्यापारे वा लडादेर्वर्तमानत्वाद्यनुभवकत्वस्यानुत्पन्नत्वाच्च ॥

उपस्थिते तथाविषयत्वेऽप्याख्यातोपस्थापितवर्तमानत्वस्य श्रोत्तरकालिकशाब्दबोधोऽनुपेयत इत्यत आ
हतस्येति । अपदार्थत्वात् । पदानुपस्थितत्वात् । तथा च पदानुपस्थितार्थस्य शाब्दबोधाविषयत्वनियमेन
तथाकल्पनायां मूलं भवादिति भावः । ननु तत्र यत्नबोधे परमध्याहार्यं न ध्याविधबोधे गौरिकार्य इत्यत आह क
ऋस्यत्रेति । जानाति [illegible] छतीत्यादौ इत्यर्थः । अनुत्पन्नत्वादिति । शाब्दबोधे पदजन्यपदार्थोपस्थितेः तादृशा
र्थकारणाभावस्यापि सत्त्वादित्यर्थः । तथा च जानातीत्यादौ आश्रयत्वे वर्तमानत्वान्वयवारणार्थं विशेष्य
तावच्छेदकतासंबंधेनाश्रयत्वोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञानजन्यवर्तमानत्वप्रकारकशाब्द
बोधं प्रति प्रकारतासंबंधेन तादृशानुनिरूपितवृत्तिज्ञानजन्योपस्थितेर्हेतुत्वकल्पनेन । रथो गच्छतीत्या
दौ धात्वर्थवर्तमानत्वान्वयवारणाय विशेष्यतावच्छेदकतासंबंधेन व्यापारोपस्थापकाख्यातपदनिरूपि

नचपाकजनकवर्तमानव्यापारेणपाकजनकवर्तमानयत्नानुमानं॰ यत्नविगमेपिपाकानुवृत्तेः धर्मविशेष

आ॰शि॰टी॰ तद्वृत्तिज्ञानजन्यवर्तमानत्वप्रकारकशाब्दबोधंप्रतिआख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेःप्रकार
१५ तासंबंधेनहेतुत्वकल्पनेनचतत्राख्यातपदार्थोपस्थितेर्वर्तमानत्वान्वयबोधासंभवइतिभावः।नन्वाख्यातोप
स्थापकाख्यातपदज्ञानजन्यवर्तमानत्वप्रकारकशाब्दबोधंप्रतियत्नपदजन्योपस्थितेरपिविशेष्य
वह्निदहकता तासंबंधेनातिरिक्तहेतुताकल्पनान्नानुपपत्तिरितिचेद्तादृशातिरिक्तकार्यकारणभावकल्पनापे
क्षयाआख्यातस्ययत्नत्वविशिष्टशक्तिकल्पनायालघीयस्त्वात्।नन्वयंकालःपाकजनकवर्तमा
नयत्नवान्पाकजनकवर्तमानव्यापारवत्त्वात्इत्यनुमानात्स्थवतीत्यादौपाकजनकवर्तमानयत्ना
नुभवोपपत्तिरित्याशंक्यनिराकरोति।नचेति।यत्नविगमेपीति।तथाचव्यभिचारेणव्याप्तिग्रहासंभवे
नतथाविधानुमितिर्नसंभवतीतिभावः।ननुतथाविधवर्तमानत्वविशिष्टकालिकविशेषणतासंबं एम् १५

निष्ठताचयत्नस्यनप्रतीयेत॰

तद्व्यधिकरणव्यापारस्यापि पाकजकत्वात्· चैतन्याविनाभूते चैत्रत्वादिविशेषितेन तेन यत्नानुमानमिति चेन्न·

येन तादृशव्यापारस्य हेतुत्वमङ्गीकार्यं। अतोऽनेकान्तानुपपत्तिरित्यत आह। धर्मिविशेषेति। चैत्रादिव्यक्ति इ
त्यर्थः। ननु चैत्रः तथाविधवर्तमानयत्नवान्। तथाविधवर्तमानव्यापारवत्त्वात् इत्यनुमानेन
चैत्रे वर्तमानयत्नानुभवनिर्वाहो भविष्यतीत्यत आह। तद्व्यधिकरणेति। तथाविधयत्नव्यधिकरण
काष्ठादिव्यापारस्यापीत्यर्थः। चैतन्याविनाभूतेति। चैतन्यव्याप्येत्यर्थः। इदन्तु स्वरूपकथनपरं। न हेतु
तावच्छेदककोटौ निविष्टं तत्र निवेशे प्रयोजनाभावादिति। शोभनादेरित्यादिना च सौन्दर्यापर
पर्यायशोभनत्वविशिष्टतथाविधव्यापारस्यैव तत्र तथाविधवर्तमानयत्नानुमापकत्वमुपेयमि
ति वाच्यं। काष्ठादेरपि सौन्दर्यसंभवेन तथाविधयत्नविशिष्टहेतुसंभवे व्यभिचारस्य दुर्वारत्वान्नापि
तु तथाविधयत्नविशिष्टसमवायादेर्हेतुतावच्छेदकसंबन्धत्वाभ्युपगमान्न व्यभिचारावकाश इति। नहि
चैत्रत्वाद्यप्रतीतावपि शोभनः पचतीत्यादौ शोभनादेः पाकजनकयत्नवत्त्वप्रतीतेरिति· सत्यं·

तत्राख्यातस्य जनकपले लाक्षणिकत्वात् ॥ मैवं ॥ जनकत्वापारमपेक्ष्य लाघवेन जनकयत्नस्यैव श

आ॰ टी॰ १ सत्तानस्य संबंधतायां प्रमाणाभावात्। पचतीत्यादौ सर्वत्र तत्संबंधघटितत्वापत्तिश्च तत्त्वे प्रमाणाभावाच्च।
१६ तत्राख्यातस्येति। पचतीत्यादावाख्यातस्य जनकपले लक्षणायाः स्वीकार्यत्वादिति भावः। लाघवेनेति।
अनन्यथासिद्धनियतोत्तरवृत्तित्वरूपजन्यत्वात्मकस्य व्यापारत्वस्याख्यातपदशक्यतावच्छेदकत्वक-
ल्पनागौरवात्तदपेक्षया कार्यसामान्यजनकतावच्छेदकत्वेन सिद्धाया यत्नत्वजातेरेव शक्यतावच्छेदक-
त्वे निवेशनस्यौचित्यमिति भावः। ननु सर्वमिदं संभवति जन्यत्वस्योक्तरूपत्वे। तदेव तु नास्त्यतिरिक्त-
त्वांगीकारात्। तथा चातिरिक्तजन्यत्वात्मकव्यापारत्वस्याख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वे
न किंचिद्बाधकमुपलभ्यामः। साधकं चैतत्। योगच्छतीत्यादौ लक्षणाया अकल्पनमिति चेत् सत्यम्। व्यापारत्वस्य राम
आख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वे अनंतसंयोगविभागादिरूपजन्यसामान्यस्याख्यात १६

पदशक्यत्वकल्पने गौरवात्तदपेक्षयात्र मात्रेण तच्छक्तिकल्पने लाघवस्यातिस्फुटत्वात्। यत्तु स्यापि व्या
पारतया तत्र शक्तिकल्पन स्व आधार समुदायस्य शक्तिकल्पनेप्यावश्यकत्वात्। केचित्तु आख्यातस्य सम
वायमात्रे शक्तिः। समवायत्वं शक्यतावच्छेदकं तज्जातिविशिष्टं। सुरभेर्योगस्य योगारूढीति सारोपवती
तादृशे चनतकायते लक्षणोत्ताकुः। तदपि न सम्यक् आख्यातस्य समवाये शक्तिकल्पने गौरवात्। न च सम
वायस्यैकतया न गौरवावकाशो लाघवमेवानेन तच्छक्तिकल्पनापेक्षया स्फुटमेवेति वाच्यं एकस्मिन्
समवाये आख्यातशक्तिकल्पने केवलेचैव स्वघटसानवृत्तादृशायां चैत्रो घटं जानातीतिवच्चैत्रो घटं
जानातीति प्रयोगापत्तिः। भवन्मते आत्मत्वादि समवायापेक्षया ज्ञानादि समवायस्यैव लक्षणाभावे
न आत्मत्वादि समवायवति मैत्रात्मनि ज्ञानाभावदशायामपि ज्ञानसमवायसत्त्वात्। यदि वा आख्यातस्य

यत्नं विना जनकमात्रे शक्तिरस्तु लाघवात् तथा चाचेतनेनापि प्रयोगो मुख्य एवेति चेन्न अपचस्थेपि

आ॰ शि॰ टी॰ १७ शार्थसमवायान्वये तत्तद्धात्वनिरूपितत्वविशिष्टस्वरूपसंबंधत्वं मुख्यीकृत्योक्तबाधकोद्धारः संभाव्यते तथाप्यतिरि
क्तसमवायत्वमात्मत्वाननुपदर्शकावच्छेदकमुक्तविशेष्यतासंबंधेन नूनमात्रविशेष्यकज्ञानादिकमिसत्त्वावि
निगमनाविरहेण गौरवं दुरुद्धरमेव यत्नशक्तिवादिमते तु यत्नत्वस्य जातित्वात्तदितरस्यायत्नसाधारणस्य
गौरवेण शक्यतावच्छेदकत्वस्यासंभवादुक्तिः कृतयाल्लाघवस्यत्र लगोपदर्शकवारणीयत्वमेवेति तु धीभिरस्म
त्पयमपहाय शाकते यत्नं विहायेति लाघवादिति जनकयत्नशक्तिवादिनामपि जनकाशे शक्तिकल्पनस्यावश्य
कतया जनकशक्तिवादिमते एतदतिरिक्तशक्त्यकल्पनेन लाघवसंभवादिति भावः तथा चेति जनकमात्रशा
क्तिकल्पने चेत्यर्थः अचेतनेपीत्यादिः रथो गच्छतीत्यादौ गमनजनकनोदनादिसंयोगादेः रथादौ सत्त्वेन आ
ख्यातस्य शक्तत्वेन तथा प्रयोगसंभवेन तत्राख्यातस्याल लक्षणाकल्पनमपि नावश्यकमिति भावः अपचस्थपीति न चामाधी राम १७

पाकजनकादृष्टवत्यपि पचतीति प्रयोगापत्तेः

पाकजनकादृष्टजनकत्वेऽपि न पाकजनकत्वे मानाभावात् अत एव क्षित्यादेः कृतिजन्यत्वे साध्ये न ज-

२ न्यजनकेति हरीकरणीया अदृष्टस्यासाधारणकारणतया न तत्र कृतिपाकयत्नपुरःसरं पचतीति प्रयोगापत्ति
रिति वाच्यं गौरवात्। ननु पाकजनकादृष्टजनकत्वेऽपि पाकजनकत्वे यागादिर्न करोतीति कालेऽपि प-
चतीति प्रयोगापत्तिरिति शंकां वारयति। पाकजनकादृष्टजनकत्वादि। मानाभावादिति। तस्य पाकादिज-
नकादृष्टजनकत्वेन पाकप्रयोजकतया अन्यथासिद्धत्वेन बाधादिना अनुमानादिप्रमाणस्यानवतारा-
दित्यर्थः। अत एवेति। तज्जनकादृष्टजनकत्वे तज्जनकत्वे प्रमाणाभावादेवेत्यर्थः। क्षित्यादेरित्यादि। क्षि-
तिः सकर्तृका कार्यत्वादितीश्वरानुमाने इत्यर्थः। तज्जनकेति। क्षित्यादि जनके इत्यर्थः। अर्थान्तरप्रसंगोपीति।
इष्टमायातमिति न स कर्तृकत्वस्यादृष्टद्वारा कृतिजन्यत्वार्थकत्वेन तथा चानुपपत्त्यभावादिति। ननु कृतीष्ट-
त साधनताया विध्यर्थत्वादि सोऽहमनेन तज्जनकादृष्टजनकत्वे तज्जनकत्वस्य वेदबोधितत्वेन करणत्वत्वा

नकादृष्टजनकत्वादिना अर्थान्तरप्रसंगोऽपि प्रत्युक्तः।

१ + तादृशशक्तिवारणायेति। तादृशशक्तिकालेन त्वाविषय

आ·शि·टी· कथमतिप्रसंगोऽत आह। भावे चेति। तज्जनकादृष्टजनकक्षणे तज्जनकत्वेसमानासङ्गच्छेत्यर्थः। त्वयापीति।
१८ जनकमात्रे शक्तिर्यान्न हि नापीत्यर्थः। ननु जनकत्वे आख्यातस्य शक्तिकल्पने आकपतावच्छेदकगौरवात्तद्वैशिष्ट्य
केवलयत्नत्वविशिष्टे शक्तिकल्पनस्यैवोचितत्वात्तथैवास्तु यत्नमात्रमिति। यत्नत्वविशिष्टमात्रमित्यर्थः। नचाख्या-
तस्य यत्नमात्रवाचकत्वे आख्यातपदयत्नपदयोः पर्यायतापत्तिः। तच्छक्यतावच्छेदकावच्छिन्नशक्तत्वस्य
तत्पर्यायपदार्थत्वादिति वाच्यं। इष्टत्वात्। ननु विषयत्वसम्बन्धावच्छिन्नसंसर्गताभ्युपगमे पाकानुपधायकपाक-
गोचरयत्नवति पुरुषे पचतीति प्रयोगापत्तिरत आह। जनकत्वे चेति। फलोपधायकत्वे चेत्यर्थः। फलोपधायकत्व-
वत्ताच्छक्तित्वावच्छिन्नजनकत्वमतिरिक्तं वैयाकरणमतमाह। कर्तृकर्मणीति। लकारवाच्ये। राम
आख्यातवाच्यो हतीति। इत्येकोऽर्थः। सामानाधिकरण्यानुरोधादिति। नामाख्यातयोरेकधर्मिबोधकत्वरूपसा- १८
भावेवातादृशशक्तिनिराकरणाय अदृष्टाद्वारकत्वेन जनकतायाः त्वयापि वाच्यत्वात्। यत्नमात्रे शक्यं। विषयत्वं
जनकत्वं वा संसर्गमर्यादया भासत इति नव्याः॥ कर्तृकर्मणोर्लकारवाच्ये। चैत्रः पचति मैत्रेण पच्यते इति सामानाधि

अन्यथा प..ष्ठीस्यादीकर्तरि ..सा मा· पच्यते इ. स्वत्रापि कर्मणि द्वितीया स्यात्· तयोरनभिहिताधिकारीय्यत्वात्

मानाधिकरण एव बोधस्यानुभवसिद्धत्वादित्यर्थः ननु एवं तादृशानुभवे मानाभावादित्यत आह अन्यथेति कर्तुराख्यात
कर्मण्याख्यात तयोः कर्तृकर्मणोरनभिधायकत्वे इत्यर्थः तयोरिति। द्वितीयातृतीययोरित्यर्थः अनभिहिताधिका
रीयत्वादिति। कर्तृवाचानभिधा.. वाख्यातसमभिव्याहारे विहितत्वादित्यर्थः यत्राख्यातेन क..र्ता नाभिधीय
ते तत्र तृतीया। यत्राख्यातेन कर्म नाभिधीयते तत्र द्वितीयाभियुक्तसंमते इति भावः ननु आख्यातस्य .. नभिधा
यका .. नभिधायकत्व एव द्वितीयातृतीययोर्नियामकौ। .. तथा च कथमाख्यातस्य कर्त्राद्यभिधायकत्वमित
धा त आह। कृतस्विनेमेति अविशिष्टत्वादिति। कर्माख्यातसाधारणत्वादित्यर्थः तथा च नैयायिकनये कर्मा
ख्यातस्यापि कृतिवाचकतया तत्र तृतीया न स्यादिति भावः नच नैयायिकनये कर्मण्याख्यातं कर्मत्वार्थकं तया क स्य
थमेतदिति वाच्यं। प्राचीननैयायिकनये एव एतदभिधानात्। स्फुटीभविष्यति चेदुपरिष्टादाख्यातेन क

कृत्यविधानस्याविशिष्टत्वात्

यत्र धातूत्तरप्रत्ययेन कर्तृगतसंख्याभिधीयते तत्र कर्तरि न तृतीया । यत्र कर्तृगतसंख्या नाभिधीयते तत्र
आशि॰ टी॰ र्तृकर्मणोः सा हि नियमः । द्वितीयातृतीययोस्तदभावयोश्च नियमस्यार्थः । यत्र धातूत्तरप्रत्ययेन कर्मगतसंख्याभिधीय
१६ ते तत्र कर्मणि न द्वितीया भावः । तेन यत्र कर्मगतसंख्या नाभिधीयते तत्र कर्मणि द्वितीयेति भावः । चैत्रेण दृष्टो घ
टः इत्यादाविति । न च सुपः संख्याभिधायकत्वे चैत्रो रूपवानित्युदाहरणासंगत्या चैत्रेण दृष्टो घटः इत्येतावत् न रूप
र्यन्तानुधावनमफलमिति वाच्यं । न च क्रियारहितवाक्यमस्तीति न्यायेन चैत्रो रूपवान् इत्यादौ गच्छतीति क्रिया
मुख्याहर्तव्यैवं सर्वत्र संख्याबोधसंभवे सुपः संख्याभिधायकत्वेनेति शंकानिराकरणासंभवेन सुपः
संख्याभिधायकत्वे सक्रियतथाविधवाक्यपर्यन्तानुधावनफलस्याप्यनेकत्वमिति हि । कृत्संज्ञात्तेः सुपश्च
वेति अत्र कृत्संख्या कृत्संज्ञकेः सुप्यदादिस्वर्थः । न तदभिधायकत्वमिति । न तिङः संख्याभिधायकत्वमि
त्यर्थः । तथा च देवदत्तो गच्छतीत्यादावपि तिङः संख्यानभिधायकत्वेन तृतीया स्यादिति भावः । तादृशा राम॰ १६
कर्तृकर्मगतसंख्याभिधानानभिधानाभ्यां नियमः । न च चैत्रेण दृष्टो घटः इत्यत्र विना

सुपमिति। द्वित्वादिसंख्याबोधकं मुख्यं द्विमित्यर्थः। द्वित्वादिप्रसत्याद्विति। तथा च नत्र द्वित्वादिबोधान्यथानुपपत्तिरिति
ऽपि संख्यावाचकत्वमित्यर्थः। ननु चैत्रो मैत्रश्च गच्छत इत्यादौ [redacted] मैत्रपदोत्तरसुब्विभक्तेर्द्वि
त्वादिलाक्षणिकतया द्वित्वादिबोधसम्भवेति चेः संख्याभिधायकत्वे निर्युक्तिकमिति। तदप्रहेयो। विनिगमनाविरह
पात नत्र चैत्रपदोत्तरसुब्विभक्तेरपि लक्षणया द्वित्वबोधकत्वस्यावश्यकत्वे चैत्रद्वयमैत्रद्वयं च प्रतीयेते त्यापत्ते
र्दुर्वारत्वात्। न चैकवचनोपस्थितैकत्वान्वितचैत्रादौ कथं तिङः प्रत्ययाद्द्वित्वादेरन्वय इति तु नाशङ्कनीयम्। तत्रै
कत्वस्याविवक्षितत्वादिति। ननु तथाप्युपदर्शितयुक्त्या तिङो द्वित्वाभिधायकत्वमस्तु। एकत्वाभिधायकत्वं तु तस्य
निर्युक्तिकमित्याशङ्कामपाकर्तुमाह। लाघवादेकवचनत्वान्तर्भावेनेति। तथा चैकवचनत्वविशिष्टसुप्त्वे
कत्वशक्ततावच्छेदकत्वमपहाय एकवचनत्वस्यैव शक्ततावच्छेदकत्वकल्पनमुचितं। एकवचनत्वं चाभिमु
चैत्रो मैत्रश्च गच्छत इत्यादौ विनापि तादृशारूपं द्वित्वादि प्रत्ययात् लाघवादेकवचनत्वादिना एकत्वादौ शक्तत्वाच्च

व्या॰ त्रि॰ टी॰ कैरेकवचनत्वेन पारिभाषितत्वे । तस्य तिवादिसाधारणमिति तिवादेरप्येकत्वबोधकत्वमक्षुण्णमिति भावः । केचि

२० त्तु । एकवचनीसाधारणं व्याख्यातपदार्थलक्षणं याख्यातत्वावाकर्तुर्बोधेपि नत्वति यत एवं एकत्वबोधस्यानुभवसिद्धत्वा

त्तिप एकत्वबोधत्वमावश्यकं । नचैव व्याख्यातस्यैकत्वविशिष्टकर्तृलक्षणेतिवाच्यं । नियमतः प्रतीयमाने

प्यर्थे लक्षणाकल्पने यत्ने प्याख्यातस्य शक्तिकल्पनस्य निर्युक्तिकत्वे लक्षणायैव तत्र यत्नबोधसंभवादिसा

नवं कृः । कर्तृकर्मसंख्याभिधानानभिधानाभ्यां इसारभ्यनास्तीत्यें [illegible] कात्र धोपरि वैयाकरणाः समाधत्ते । क

तेत्यादि । तथा च लक्षि भक्तिं विना कृतेः स्य स्वावस्थानासंभवात् कृत्यग्योतरसुपरावसंख्याबोधसंभवे कृतः

संख्याबोधकत्वं निर्युक्तिकं । नुन्वविनिगमनाविरह इति वाच्यं । एकवचनत्वेन सुपूस्तत्वेन कोरप्यत्वेल्के सत्वात् । राम

एवं चैवोभयामंगतवान् रसादेरभिधानात्तत्र कृतः स्वस्य संख्यानभिधायकत्वे नन्तरीयापत्तेव्र लक्षणोप्प २०

किंच एककर्तृत्वादिना संख्याभिधानेन नियमः पदार्थतावच्छेदकावच्छिन्नस्याकांक्षादिवशात् कर्तृकर्मसाधार

णत्वापत्तेरिति। ननु यत्राख्यातेन कर्मसंख्याभिधीयते तत्र प्रथमा। यत्र चाख्यातेन कर्तृगतसंख्याभिधीयते तत्र तृ
ल तीयेत्यादिनियमो वाच्यः। तृतीयस्थलेऽपि कर्त्रादेरभिधानानभिधानाभ्यां तथा नियमो वाच्यः। तत्र च को विशेष
इत्यत आह किंचेति। न नियम इति। कर्त्राख्यातेन कर्तृगतसंख्यैवाभिधीयते न तु कर्मगतसंख्या। एवं कर्माख्या
तेन कर्मगतसंख्यैवाभिधीयते न तु कर्तृगतसंख्येति नियमालाभ इत्यर्थः। ननु तादृशनियमालाभे का
क्षतिरित्यत आह। पदार्थतावच्छेदकावच्छिन्नस्येति। एकत्वत्वावच्छिन्नस्येत्यर्थः। आकांक्षादिवशात्। ए
कत्वावच्छिन्ननिरूपितशक्तिवशादित्यर्थः। तथा च चैत्रो ग्रामं गच्छतीत्यत्राख्यातेन कर्मगतसंख्याबो
त्रै धनेबाधकाभावेन तत्रापि कर्मणि प्रथमा स्यात्। एवं चैत्रेणौदनः पच्यते इत्यत्राप्याख्यातेन कर्तृगतसं
ख्याबोधनेबाधकाभावेन तत्रापि कर्तरि प्रथमापत्तेरिति भावः। ननु कर्त्रेकवचनत्वावच्छिन्नस्य कर्त्रेकत्व

कर्त्रैकत्वत्वादिनाभिधाने तु कर्त्रादेरप्यभिधेयत्वेंशांशे शक्यताशक्यतावच्छेदकयोश्च गौरवमधिकं

श्री·शि·री तं शक्यतावच्छेदकं एवं कर्मैकवचनत्वावच्छिन्नस्य कर्मैकत्वं शक्यतावच्छेदकं वा तथा च शक्यतावच्छेदकश
२१ क्यतावच्छेदकभेदान्न सर्वत्र कर्तृकर्मसाधारणैकत्वबोध इत्यत आह। कर्त्रैकत्वत्वादिना। अभिधाने विभिक
लो र्त्रैकत्वत्वादिना कर्त्रैकत्वत्वादौ कर्त्रैकवचनत्वावच्छिन्नं दिः शक्तिकल्पने विनिगमकेन। आदिना कर्मैकत्वादि क
चे परिग्रहः। अभिधेयत्वेंशांशे शक्यतावच्छेदककोटिप्रविष्टत्वं इदमुपलक्षणं। कर्त्रादिपदस्यापि शक्यताव
च्छेदककोटिप्रविष्टत्वमित्यपि बोध्यं। ननु एतेन किमायातमित्यत आह। शक्यताविशेषादि। शक्यताविशेष
गौरवमित्यस्य तेनान्वयः। तथा च कर्त्रादिघटितधर्मविशिष्टे शक्तिकल्पनेन तद्घटितधर्मस्य शक्यताव
च्छेदकत्वकल्पनेन च कर्त्रादिपदघटितधर्मस्य शक्यतावच्छेदकत्वकल्पनेन च महद्गौरवं नैयायिकमते। वै राम
याकरणमते तु एकत्वत्वादिना शक्यता एकवचनत्वादिना शक्यतेति लाघवमिति स्फुटमिति भावः। वैया २१

तस्मादाख्यातत्वेन कर्त्तरि कर्मणि चात्मनेपदत्वेन एकवचनत्वादिना तत्तद्रूपेणैवा एकत्वादौ शक्तिः एकपदो
पात्तत्वाच्च संख्यायाऽवाच्यगामित्वं [illegible]
करणमतमुपसंहरति। तस्मादिति। तत्तद्रूपेणैवेति। तिप्त्वादिनैवेत्यर्थः। ननु एवं सति वैयाकरणमते कथं क
र्त्राद्याख्यातस्थले कर्मादौ संख्यान्वय इत्यत आह। एकपदेति। कर्त्रादिसंख्ययोरेकाख्यातपदोपस्था
प्यत्वादित्यर्थः। वाच्यगामित्वमिति। कर्त्राख्यातादिस्थले संख्यायाः कर्त्रादिष्वन्वयित्वमित्यर्थः। तथा
च एकपदोपस्थाप्यानामर्थानां मिथः सति बाधके एकत्रापरान्वय इति नियमेन एकत्वादिनिष्ठप्रकारता
निरूपितकर्तृनिष्ठविशेष्यतासंबन्धेन कर्त्राख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति कर्त्राख्यात
पदज्ञानजन्यकर्तृपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वस्य एवमेकत्वादिनिष्ठप्रकारतानिरूपितकर्मनिष्ठवि
शेष्यतासंबन्धेन कर्माख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति कर्माख्यातपदज्ञानजन्यकर्मो
पस्थितेर्विशेष्यतासंबन्धेन हेतुत्वस्य च कल्पनीयतया न कर्त्राख्यातस्थले कर्मादौ संख्यान्वयबोध इति

कर्तृकर्मबो॰ कर्तृत्वं च एकदाव्युत्पन्नं अतो मैत्रः पच्यते लङ् लुङ् स्यादयो न प्रयोगाः।

भावः ननु कर्तरि आख्यातत्वेन कर्मणि चात्मनेपदत्वेन शक्तिकल्पने चैत्रः पच्यते तं डुलङ्स्यादिप्रयोगापत्तिः। त

श्री·शि·टी त्राख्यातस्याख्यातत्वेन कर्तरि त्वात्मनेपदत्वेन च तस्य कर्मणि वृत्तिसंभवे न आत्मनेपदत्वेन च तस्य कर्मणि वि प

२२ च्छिति संभवेन तयोस्तत्र चैत्रः तं उलादौ अभेदसंबंधेनान्वयबोधे बाधकाभावादिसत आह। कर्तृकर्मसा

रि एकदाव्युत्पन्नमिति। एकस्मिन् काले एकस्याकृष्टमित्यर्थः। तथा च तदाख्यातपदजन्यकर्तृत्वप्रकार

ककर्तृविषयकशाब्दत्वावच्छिन्नं प्रति कर्मतावोध गृहीततात्पर्यकतदाख्यातपदजन्यत्वज्ञानत्वादिना

एवं तदाख्यातपदजन्यकर्मत्वप्रकारककर्मविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृबोधगृहीततात्प

जन्य र्यकतदाख्यातपदजन्यत्वज्ञानत्वादिना च प्रतिबंधकत्वस्य कल्पनीयतया नैकदा एकाख्यातपदात् कर्तृकर्म राम

णोर्बोधापत्तिरिति भावः। केचित्तु तदाख्यातजन्यकर्तृत्वप्रकारककर्तृविषयकशाब्दबुद्धित्वावच्छिन्नप्र २२

कर्त्रु

तिकर्मत्वबोधकसुप्विभक्तिसमभिव्याहृतधातुसमभिव्याहृततदाख्यातपदज्ञानजन्यकर्मोपस्थितेश्चहेतुत्व न्य
स्यकल्पनीयतया नैकदा एकाख्यातपदात्कर्तृकर्मणोरन्वयबोधः। चैत्रेणतंडुलश्चैत्रस्तंडुलः पच्य
ते इत्यादिप्रयोगोवेष्टापत्तिस्तत्र युगपदन्वयबोधे कस्याप्यविवादादित्याशयः। ननुउपदर्शितरीत्या मैत्रः पच्य
ते तंडुल इत्यादिप्रयोगवारणेपि चैत्रः पच्यते तंडुल इत्यादिप्रयोगापत्तिर्दुर्वारैवेति तत्र कर्मताबोधकगहि
ततोर्थकाख्यातपदज्ञानाभावात्। कर्मताबोधकसुब्विभक्तिसमभिव्याहृतधातुसमभिव्याहृततदाख्या
तपदज्ञानजन्यकर्त्रुपस्थितिसत्वात्कर्तृबोधेबाधकाभावादित्यतआह। कर्तरीति। तथा च कर्तृत्वाद्यु
स्थितिजनकतावच्छेदककोटौ आख्यातपदांशेयगाद्यसमभिव्याहृतत्वमपि निवेशनीयमिति नापूर्वोक्त
प्रयोगापत्तिरिति भावः। नैयायिकः प्रसक्तिं घ्नते। अत्र वदन्तीतिनैयायिकनयेलाघवात्तिङ्त्वादि
कर्तरियकोऽसाधुत्वात् पच्यते मैत्रस्तंडुल इत्यादमोपि कर्तरिनेतिवैयाकरणाः अत्रवदंति

भावनाविशेष्ये संख्याया अन्वयः समानपदोपात्तत्वेन एकान्वयित्वस्योचितत्वात्

श्रा॰री॰री॰ शाब्दनावच्छेदकाख्यातपदाऽक्तानुक्तविभागमूलीभूतकर्तृकर्मगतसंख्याभिधानानभिधानविघातकं क
२३ र्तृकर्मसाधारण्येन संख्याबोधाया इनं निराकर्तुमाह भावनाविशेष्य इति। समानपदोपात्तत्वेनेति। एकप
दोपस्थाप्यत्वेनेत्यर्थः। एकान्वयित्वस्य बाधकं विना नियमसिद्धत्वादित्यर्थः। नन्वेकपदोपस्थाप्यानामेका
र्थान्वयित्वनियमो अप्रयोजकत्वादुपेक्षणीय इति चेन्नैवम्। तथाविधनियमस्वीकारे लाघवस्यैव प्रयोज
कत्वसंभवात्। तथाहि। आख्यातपदोपस्थाप्यभावनारूपैकार्थस्यान्वयबोधार्थं अवश्यं पदार्थान्तरे
चैत्राद्युपस्थितिकल्पनमावश्यकं। असमथापदार्थान्तरस्य चैत्रादेः पदजन्योपस्थितिसभावे शाब्दबोधे भा
नुप नाप्रसानत्र भावनान्वयस्यानुपपत्तेः। तथा च संख्याया अपि चैत्राद्यन्वयस्वीकारे पदार्थान्तरोपस्थित्य
नराकरणप्रयुक्तं लाघवमतिस्फुटमेवेति युक्त उक्तो नियमः। न चोक्तनियमाभ्युपगमे पचेनैत्स्यादोकतिसाभ राम
२३

भावनायाश्च विशेष्यत्वेनान्वययोग्यः कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः। तथैव साकांक्ष त्वात्।

त्वान्वितपाके संख्यान्वयापत्तिरिति वाच्यं आख्यातपदज्ञानजन्यसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति वि-
शेष्यपदजन्याख्यातपदार्थभावनाविशेष्योपस्थितेर्विशेष्यतासंबंधेन हेतुत्वस्य कल्पनीयतया उपदर्शि-
तापत्तेरभावात्। न च तथाप्युपदर्शितस्थले उपदर्शितनियमभंगप्रसंग इति वाच्यं अन्यथानुपपत्त्या तादृश-
नियमे ह्यतिसाध्यत्वे हि साध्यत्वाद्यतिरिक्तत्वेन एकपदोपस्थाप्यस्य विशेषणीयत्वादिति सारं। ननु भाव-
नैव कुत्रान्वेति कुत्र नेत्यत्र किं नियामकं तत्राह। भावनायाश्चेत्यादि। अन्वययोग्य इति। तथाविधान्वयः का- य
र्यकारणभावसिद्ध इत्यर्थः। तथा च यत्र कर्माद्यनवरुद्धप्रथमान्तपदोपस्थाप्यमेवाख्यातार्थभावना-
या विशेष्यत्वेनान्वययोग्यत्वस्य कार्यकारणभावसिद्धतया तत्रैव भावनान्वय इति भावः। ननु कीदृश-
कार्यकारणभावसिद्धः तथान्वयस्तत्राह। तथैवेति। भावनानिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेना

शि·टी· २४ ख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेनाख्यातपदसमभिव्याहृतप्रथमांतनामपद
ज्ञानजन्यकर्मत्वाद्यनवरुद्धार्थविशेष्यकोपस्थितित्वेनेत्यर्थः। साकांक्षत्वादिति शाब्दबोधपदजन्यो
पस्थितौ कार्यकारणभावकल्पनादित्यर्थः। तथा च तादृशकार्यकारणभावबलात् तथाविधप्रथमां
तपदोपस्थाप्य एव भावनायां विशेष्यत्वेनान्वयनियम इति भावः। ननु प्रदर्शितकार्यकारणभावे कारणता
वच्छेदककोटौ कर्मत्वाद्यनवरुद्धत्वविशेषणं व्यर्थं। यदि च कर्मत्वाद्यनवरुद्धत्वविशेषणमंतर्निवेश्य तथाविधा
न्वयबुद्धिं प्रति प्रथमांतपदजन्योपस्थितेर्हेतुत्वे चैत्र इव मुखमस्तीत्यादौ प्रथमांतपदोपस्थापितविषये चैत्रे सादृश्यप दो
चभावनायान्वयप्रसंगस्तथा प्रकृते शाब्दबोधे इतरविशेषणार्थकं कर्मत्वाद्यनवरुद्धत्वं तत्र कारणतावच्छेद एम
मिति ककोटौ निवेश[illegible]नीयं विभाव्यते। तथापि तत्र प्रथमांतत्वविशेषणं व्यर्थमेव। द्वितीयांतपदजन्योपस्थि २४

तिविषयीभूतार्थस्य शाब्दबोधे कर्मत्वविशेषणतयाऽन्तरविशेषणतया [redacted] र्थविशेषणत्व
विरहेऽपि तत्र भावनायामन्वयबोधापत्तिवारणासंभवात्। एतेन भावनानिष्ठप्रकारतानिरूपितविशेष्यता
संबंधेनाख्यातपदजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमांतपदजन्योपस्थितेर्विशेष्यतासंबंधेन हेतुत्वं
कल्प्यते। ननु तत्र कर्मत्वाद्यनवरुद्धत्वमपि निविशते तस्य निर्वचनाशक्यत्वात्। न च प्रकृतशाब्द
बोधेऽन्तराविशेषणत्वमेव तत्। प्रकृतत्वं च प्रथमांतजन्यत्वमिति वाच्यं। चंद्र इव मुखं चंद्रो राजत इत्यादि
वाक्यद्वयजन्यसमूहालंबनबोधे चंद्रे भावनान्वयानुपपत्तेः। न च प्रथमांतपदजन्यशाब्दबोधे विशेष्य
त्वाभाववत्त्वे सति तथाविधशाब्दबोधेऽन्तराविशेषणत्वमेव तदिति वाच्यं। तथा सति तादृशधर्मस्यापरिचि
तकारणतावच्छेदककोटौ निवेशे परस्परविशेषणविशेष्यभावे विनिगमनाविरहेणाकार्यकारणभावद्व

शि॰टी॰ २५ ल्पस्य उक्तरीत्या अतिरिक्तत्वात् । तथाविधान्वयबुद्धिं प्रति स्वीयविशेष्यत्वाभावविशिष्टप्रकारतासंबंधेन शाब्दबो
धस्यैव कार्यकालवृत्तितया प्रतिबंधकत्वकल्पनमुचितं । तादृशप्रतिबंधकाभावकारणत्वकल्पकानु
पपत्तिः कर्मत्वाद्यनवरुद्धरत्नादिपदार्थेन तदर्शिता । तादृशानुपपत्तौ तथाविशेषणानुपादाने तादृशप्रति
बंधकाभावस्याहेतुत्वापत्त्या चैत्रस्य सुखमस्तीत्यादौ चैत्रादिपदार्थभावनायामन्वयप्रसंगः इति तदु
पादानं । सापि पूर्वोक्तानुपदर्शितप्रतिबंधकाभावस्याहेतुत्वेपदजन्यपदार्थोपस्थितिकारणतावच्छेदकको
टौ प्रवेशप्रयोजनं तत्त्वविशेषणोपादानस्य सार्थकतया तत्र तदुपादानसंभवात् । तथाविधविशेषण
स्यानुपपत्तौ निवेशप्रयोजनाभावादिति चेन्नैवम् । तत्र तन्निवेशे द्वितीयादिविभक्त्यन्तावच्छेदकपदेष्वनुतथा राम
विधोपस्थितिनिष्ठकारणतावच्छेदकत्वकल्पने गौरवात् । अस्मन्मते प्रथमान्तपदस्यैव तत्कल्पनमिति २५

लाघवस्यैवोपदर्शितकारणतावच्छेदककोटौ प्रवेशे प्रथमोन्नतत्वनिवेशासंपादकतयाऽपदर्शितमनुमत्या
वयिताहृशविशेषणस्यावश्यकत्वात्। अन्यथा तस्यानुसारेणोपदर्शितविशेषणाघटितकार्यकारणभाव
कल्पनाया अयोगादिति। ननु भावनाया इत्यादिग्रंथस्योपदर्शितरीत्यानुमत्तिपरत्वे तत्रैवेत्यादिग्रंथस्य
कोर्थ इति चेत्त्वमवेहि। तत्रैवेति। तादृशानुमत्यनुसारेण न तद्रूपेणैवेत्यर्थः। तथाविधप्रतिबंधकाभाव
त्वताहृशपदजन्योपस्थितित्वादिनैवेतितु निर्गलितार्थः। साकांक्षत्वात्। कार्यकारणभावस्याकांक्षा
विषयत्वात्। कल्पनीयत्वादिति यावत्। तथा चोक्तानुमत्यनुसारेणोपदर्शितकार्यकारणभावक
ल्पयित्वा भावनाया अन्वयनियममुपपादनीय इति भावः। उपदर्शितानुमत्तौ किं मानमितितु नाशंकनी
यं। तत्रानुभवस्यैव प्रमाणीकरणीयत्वात्। अन्यथानुमतिमात्रस्यैवोच्छेदापत्तेरितिहलपल्लवितेन।

चैत्रः पचति पच्यते इत्यादौ कर्तृकर्मप्रथमान्तपदोपस्थाप्यतया भावनाविशेष्यत्वे इति तत्रैव च संख्यान्वयः चैत्रेणासु

शि॰टी॰ तत्रैव चेति। भावनाविशेष्ये कर्तरि कर्मणि चेत्यर्थः। ननु भावनाविशेष्ये संख्यान्वयस्वीकारे चैत्रेणासुप्यत इत्यादौ सं-
२६ ख्यानन्वयापत्तिः तत्र भावनाविरहात् न तत्रेष्टापत्तिमाह। चैत्रेणासुप्यत इत्यादिना। प्रथमान्तपदाभावादि सम्भा-
वनाविशेष्यविरहादित्यादिमतनेन मतान्वयः। ननु चैत्रेणासुप्यत इत्यादौ धात्वर्थ एव भावनाविशेष्यत्वेनान्वेतु।
तथा च तत्रैव संख्यान्वयसम्भवे किमर्थमुपदर्शितस्थले संख्याद्यनन्वये इष्टापत्तिरित्यत आह। धात्वर्थस्येति। कु-
त्सनत्वादिति। तथा च भावनाविशेषणत्वेनैव धात्वर्थान्वय इति व्युत्पत्तिबलात् किं तु स्पष्टे चैत्रः स्वपिति इत्यादौ स्वापादिति
स्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन तथाविधवाक्यजन्यत्वाद् बुद्धित्वावच्छिन्नप्रतियोगिताख्यातपदजन्यभाव-
नोपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वकल्पनात्। चैत्रेणासुप्यत इत्यादौ स्वापादेर्भावनायां विशेष्यत्वेनान्वये बाधक- राम
त्वमिति भावः। ननु भावनायां विशेषणत्वेनैव धात्वर्थान्वय इति व्युत्पत्तौ भावाख्यातस्थले संकोचः कल्पनीयः। २६

प्यते गगनेन स्थीयते इत्यादौ प्रथमान्तपदाभावात् धात्वर्थस्य भावनायां विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात्।

भावनायाबाधितत्वाच्च · भावनाविघ्नविरहादनन्वितैव संख्या ·

भावख्यातस्थलेच धात्वर्थस्यैव भावनाविशेष्यत्वेनान्वयः इति तु सम्मतं तत्र संगीकृत सकार्यकारणाभावांतरं कल्प
यित्वा उपदर्शितस्थले धात्वर्थविशेष्यकभावनाप्रकारकबोधांगीकारे क्षतिविरह इत्यत आह । भावनायाबा
ति धितत्वाच्चैत्रेणासुप्यत इत्यादौ आख्यातार्थाश्रयत्वरूपभावनायाः स्वापे बाधेन तत्रान्वयासंभवादि
त्यर्थः । ननु निरूपकत्वसंबंधेनैव तत्र तस्याप्यन्वय संभवति इति चेत् । तथा सति चैत्रेणासुप्यतेन मैत्रेणेत्या
दौ नञर्थान्वयापत्तेः न च तत्र निरूपकत्वसंबंधावच्छिन्नप्रतियोगिताकाश्रयत्वाभावस्य स्वापे अन्वय
संभवात् न तत्र नञर्थान्वयानुपपत्तिरिति वाच्यम् इह सति त्यामक संबंधस्याभावप्रतियोगितानवच्छेदकतया
निरूपकतासंबंधावच्छिन्नप्रतियोगिताकाश्रयत्वाभावस्यालीकतया तत्र संभवेनोपदर्शितापत्तेर्दुर्वारत्वा
त् चैत्रेणासुप्यत इत्यादौ एककालीनत्वसंबंधेन स्वापे आश्रयत्वस्यान्वयः इति तु नाशंकास्पदमपि तत्र तेन

एकवचनं तु साधुत्वार्थं॰ अत एव स्वापस्य द्वित्वबहुत्वेऽपि औत्सर्गिकमेकवचनमेव॰ एवं च यथायथं वर्त्त

संबंधेनाश्रयत्वस्यान्वये निराकांक्षत्वात् मैत्रस्य जायमानायां चैत्राश्रयत्वमाहार्यापि चैत्रेणासुप्यत इति प्रयोगस

त्रि॰ दी॰ त्त्वाच्च। ननु तत्र एकवचनार्थसंख्यानन्वये एकवचनं व्यर्थमित्यत आह। एकवचनं त्वित्यादि। अत एव भावाख्या

२७ तस्थले एकवचनस्य साधुत्वार्थत्वे सत्यर्थः। औत्सर्गिकमिति। प्रथमोपस्थितमित्यर्थः। अन्यथा तत्र स्वापादेः सं

स्य ख्यान्वयस्वीकारे स्वापे द्वित्वबहुत्वेऽपि भावाख्यातस्थले द्विवचनबहुवचनापत्तेः। तत्रेष्टापत्तिर्न संभवति। अभियु

क्तविरुद्धत्वादिति भावः। ननु भावाख्यातस्थले संख्याभावनयोरनन्वये भावतिङ नैरर्थक्यमित्यत आह। एवं चे न

ति। भावाख्यातस्थले संख्याभावनयोरनन्वये चेत्यर्थः। यथायथमित्यादि। वर्तमानत्वं लडर्थः। इष्टसाधनत्व

लिङर्थ इत्यर्थः। इष्टसाधनत्वादिकमित्यत्रादिपदमतीतत्वहतिसाक्षत्वाद्यर्थकं। ननु लिङर्थेष्टसाधनत्वादेः राम

लङर्थातीतत्वादेः कुत्रान्वयस्तत्राह। तच्चेत्यादि। लिङर्थेष्टसाधनत्वलङर्थातीतत्वादिकं चेत्यर्थः। ननु त २७

मानत्वेष्टसाधनत्वादिकमर्थः॰ तच्च धात्वर्थ एवान्वेति॰ तथैव प्रत्ययात्

तद्बोधकानां घञादीनां प्रयोगसाधुतामात्रं। भावनायाश्च कर्तर्याश्रयत्वेन कर्मणि पुनरन्यथान्वयः

स्यान्वयेमानाभावश्च मतच्चाहान्तथैवेति। लिङादि समभिव्याहारस्थले धात्वर्थविशेष्यके इष्टसाधनत्वप्रकार
कबोधस्यैवानुभवसिद्धत्वादित्यर्थः। इदमत्रावधेयं चैत्रेण सुप्यत इत्यादौ कृत्तिलंतततीयार्थः। वर्तमानत्वं भाव
तिङर्थः। धात्वर्थः स्वापः चैत्रवृत्तिवर्तमानस्वापः। एवं चैत्रेण सुप्यत इत्यादौ भावतिङः इष्टसाधनत्वमर्थः।
तथाच चैत्रवृत्तिस्वाप इष्टसाधनमिति साध्यस्य सकारकान्वयबोधः। एवमन्यत्रापि सूक्ष्ममतिभिश्चिंतनी
यं। तद्बोधकानामिति। वर्तमानत्वाद्यबोधकानामित्यर्थः। ननु भावनायाः प्रथमयदोपस्थाप्येकेन
संबंधेनान्वयः। ननु तावदाश्रयतासंबंधेन चैत्रेण पच्यते तण्डुल इत्यत्र तण्डुले आरब्धानार्थकृतिरूपाया भाव
नाया बाधितत्वादत आह। भावनाया इति। आश्रयत्वेन। आश्रयत्वसंबंधेनेत्यर्थः। अन्यथेति विवक्षमाणा
परंपरयेत्यर्थः। तथा च साक्षात्परंपरया भावनाविशेष्यक एव संख्यान्वयः इति भावः। न च संख्याद्यतिरिक्तास्या

त्वकर्तृकर्मणोभिधायकत्ववच्चास्माकमपि तस्यान्वयबोधकत्वं·

त्रि·टी· तार्थस्यभावनापदत्वाक्कतया कर्माख्यातस्थलेकर्मत्वस्याख्यातार्थतया प्राधान्याद्भावनाविशेष्यत्वे एवं संख्या
२८ न्वयोस्तत्रलंपरंपरयेत्यस्य तिवशेनेति वाच्यं। प्राचीनमतेकर्माख्यातस्यापिकृत्सर्थतया कर्मत्वार्थकत्वा
भावेन कर्मत्वस्यभावनात्वविरहादुपदर्शितापूर्त्तेरभावादिति। ननु यथा चैत्रेण पच्यते तंडुल इत्यत्र नैयायि
कमतेपरंपरयाकर्मणिकृतेरन्वयः तथा चैत्रेण पचति तंडुल इत्यत्रापि कथं नान्वयबोधः। एवं नैया
यिकमते चैत्रः पचति तंडुलमित्यत्रेव चैत्रः पच्यते तंडुलमित्यत्रापि आश्रयता संबंधेन कृतेरन्वयबोधापत्तिः।
एवं मैत्रेण पच्यते तंडुल इत्यत्र कथं तन्मते कर्तृकर्मणोर्यथोक्तरीत्या कृतेर्नान्वयः। दर्शितस्थलेषु सर्वत्राख्या
तपदात्कृतेरुपस्थितिसत्वात् इत्याशंकामपाकर्तुमाह। नवेति। वैयाकरणानामित्यर्थः। तथा चान्वयबोधकत्वमिति।
कर्तृकर्मणोरविवक्षते बोधकत्वमित्यर्थः। तथा च वैयाकरणमते यादृशानुपूर्वीत्वावच्छिन्नं प्रतियादृशानुपूर्वी राम
२८

ज्ञानत्वेन कारणता नैयायिकमतेपि तादृशतादृशशाब्दबुद्धिं प्रति तादृशतादृशानुपूर्वीज्ञानत्वेन हेतुत्वकल्पना
न्नानुपपत्तिरिति भावः। तथाविधकार्यकारणभावकल्पनावीजस्याभावमेवस्पष्टयति। अन्तइति। तथाविधकार्य य
कारणभावकल्पनादि इत्यर्थः न प्रयोगा इति। न तादृशतादृशशाब्दबोधजनका इत्यर्थः। ननु भावनायाश
धी तिङ्सत्वेन तद्विशेषे संख्यान्वयनियमाङ्गीकारे रथो गच्छतीत्यादौ कथं रथे संख्यान्वयः। भावनाविशेष्य
७९ त्वाभावादित्यत आह। भावनाचेति। संख्याद्यतिरिक्ताख्यातार्थ वे उक्तनियमघटकीभूतभावनापदार्थ
इत्यर्थः। अचेतनानुरोधादिति। रथो गच्छतीत्यादौ रथादौ संख्यान्वयानुरोधादित्यर्थः। तथाचाख्यात
स्य कर्त्रादिगतसंख्याभिधानानभिधानाभ्यामेव प्रथमान्ततृतीयोपपत्तौ आख्यातस्य कर्त्रादिशक्तिम
भ्युपगच्छतां वैयाकरणानां मतमनादरणीयमेव। लघुत्वान्निष्ठाशक्तिवादिनैयायिकमतेप्यदूषणैः सुधीभिरिति
अतो मैत्रेण पचति तंडुलः तंडुलं पच्यते मैत्रः मैत्रः पच्यते तंडुले इत्यादयो न प्रयोगाः भावनाचव्यापारमा

विभिन्नाभ्यां रूपाभ्यामेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमासेद्धुं संभवदन्यादृशं न वार्यते

ति॰टी॰ २९ भावः। ननु नैयायिकमते आख्यातपदचैत्रपदयोर्विभिन्नरूपेण एकधर्मिबोधकत्वरूपसामानाधिकरण्या
नुभवोऽनुपपन्नः। तथा चानुभवहतविश्रामाराणां कथं तन्मतमनुमतमिति चेत् आह। विभिन्नाभ्यामित्यादि।
तथा च तादृशानुभव एवास्ति इति भावः। अन्यादृशत्वमित्यादि। एकधर्मिवृत्तिभिन्नधर्मबोधकत्वरूपसा
मानाधिकरण्यमित्यर्थः। अत्र वैयाकरणमतानुयायिनः। आख्यातस्य कर्त्रादिशक्तिकल्पने नैयायि
कमतमपेक्ष्य लाघवसंभवात् ध्येयो वितत। तथा हि। कर्तृप्रकारकज्ञानाभावत्वेन किंकप्रस सत्वावच्छि
न्नं प्रति आख्यातपदनिरूपितशक्तिज्ञानादिघटितशाब्दबोधसामग्र्याः प्रतिबंधकत्वाकल्पनेन तथा
विधशाब्दबोधसामग्रीकाले कर्तृप्रकारकज्ञानाभावप्रयुक्तलाघवमतिस्फुटमेव। नैयायिकमते तु ताप
तथाविधशाब्दबोधसामग्रीकाले तादृशज्ञानाभावरूपविषयसत्वे न विना तथाप्रतिबध्यप्रतिबंधक ५

भावकल्पनंतथाविधप्रत्यक्षवारणामन्नाक्यमितितत्कल्पनेमहागौरवंनचवैयाकरणमतेइतिप्रकारकज्ञाना
भावप्रत्यक्षप्रतितथाविधज्ञानशाब्दबोधसामग्र्याःप्रतिबंधकत्वकल्पनावश्यकत्वेऽपिनैयायिकमतमप्युक्त
लाघवावकाशःनैयायिकमतेतथाकल्पनाभावादितिवाच्यं।वैयाकरणमतेतूपस्थितिकालेइ
तिप्रकारकज्ञानस्यावश्यकत्वेनतथाविधशाब्दबोधसामग्रीकालेविषयासत्त्वैवइतिप्रकारकज्ञा
नाभावप्रत्यक्षवारणसंभवेनतथाविधप्रतिबध्यप्रतिबंधकभावकल्पनयोपदर्शितलाघवस्याक्षुण्णता
तायदिचनवीनोक्तंखलुरीत्यालक्षणेननिर्वाहः तत्रतथाविधप्रतिबंधकाभावहेतुत्वेनाधिकमितिम
मतेतथापितादृशप्रतिबंधकाभावेप्रत्यक्षेहेतुत्वसंबंधकल्पनागौरवंनैयायिकानामिमाकृत्यनन्वपिनवि
चारसहागुरुत्वारीरयाकानुकूलत्वस्याश्रयप्रकारकयोग्यताज्ञानतथाविधशब्दसाश्रयभेदज्ञानाभावस्थाल

अथ तंडुलं पचति मैत्र इत्यत्राश्रयतया चैत्रो ऽस्तु भावनाविशेष्यः मैत्रेण तंडुलः पच्यते इत्यत्र तंडुलः कथं

त्रि·टी· कबाधाभावत्वादिरूपगुरुत्वधर्मो वच्छिन्नादिद्विघटितत्वेन शाब्दबोधस्य साम्यभावेऽनंतघटपदादिसंसर्गकारणत्वं
३० बंधकत्वेन वैयाकरणमत एव गौरवेऽसंभवादि सात्वा विस्तरः । कथमिति । केन संबंधेन भावनाया वि
शेष्य इत्यर्थः । तिङ्नतो कर्तृकर्मणोर्विषयतयेति । अन्वयश्चास्य कथंपदार्थैकदेशे भावनाविशेष्ये । तथा
च चैत्रेण पच्यते तंडुल इत्यादौ तंडुले विषयतासंबंधेन भावनाविशेष्य इत्यर्थः । सविषयव्यापारेति । स
विषयव्यापाराभिधानयत्वमित्यर्थः । रथेन गम्यते ग्राम इत्यादौ नोदनाख्यसंयोगरूपव्यापारस्य
घ ख्यातार्थतया तस्य च निर्विषयतया संबंधेन ग्रामादावन्वयासंभवेनोपपत्तिं नीरीतेरसंगतासंभवेत्कि कर्तेति
भावः । चैत्रनिष्ठपाकभावनेति । मैत्रनिष्ठायां पाकानुकूलभावनायां तद्विषयत्वं तंडुलस्येत्यर्थः । तंडुलेन यथा राम
विधभावनाविशेष्ये विषयत्वं तत्पादानाम्प्रेयाख्यकर्माख्यातस्थले कर्मत्वप्रकारकस्य मैविशेष्यकबो ३०

विषयत्वमाह इति चेत् रथेन गम्यते ग्राम इत्यादौ सविषयव्यापारानभिधानेकागतिः अत्र प्राचः मैत्रेण प
पाकभावनाविषयः पाकजन्यफलशाली

तंडुलः प्रतीयत इति साक्षात्परंपरयावा भावनाविशेष्यस्तंडुलः रथेन गम्यते ग्राम इत्यत्र रथनिष्ठगमनानुकूल
व्यापारजन्यफलशाली ग्रामः प्रतीयत इति व्यापारविशेष्यो ग्राम इति॰ नव्यास्तु भावनादेशव्यात तल्लभ्यत्वा
धस्मानुभवसिद्ध॰ तेनाह। चैत्रनिष्ठेति। प्रतीयत इति। नाह्वत्रा॰ वाक्यजन्यबोधे इति शेषः। साक्षात्परंपरयावेति। अ
त्रचोपदर्शितबोधद्वयोर्विकल्पानुरोधेन न तथाचैकल्लिकोपादनमिति ध्येयं। रथेन गम्यते ग्राम इत्यादौ ग्रामे भाव
नायान्वयप्रकारमाह। रथेनगम्यते ग्राम इत्यादिना। तथाच कर्मतापाख्यातस्थले भावनायाः धात्वर्थे ऽन्वयः
कचिद्वि षयतया कुत्रचित्जन्यतया कर्मणितु परंपरयेति भावः। प्राचीनतनं त इत्यय नवीन मतं दर्शयति। नव्या
स्त्विति। ननु कर्माख्यातस्थले श्राधेयत्वस्यतृतीयार्थत्वे कर्त्राख्यातस्थलेयत्र भावनाविशेष्यत्वे नान्वे
ति कर्माख्यातस्थले सएव भावनाया विशेषणत्वेनास्तु मव लोपापापत्तिः एवं ताद्दशा वाक्येन तथावि
धे धबोजननीयेत्तृतीयादिनिरूपितशक्तिज्ञानस्य सहकारित्वकल्पने गौरवं चेत्यतआह। संख्यामात्रेचेति।
मात्रपदेनाधेयत्वव्यवच्छेदः। संबंधः। चैत्रभावनयोः संबंध इत्यर्थः। वाक्यार्थ इति तथाविधवाक्यानुपूर्वीज्ञानब
दाधेयत्वं तत्तृतीयार्थोस्तु संख्यामात्रं वा संबंधस्तु पचतीत्यादाविववाक्यार्थः अस्तु च फलकर्मणोरपिसंध

शब्दखण्ड टि.

नचतदपि तथा प्रकारीभूय भासमानत्वात्. फलावछिन्नक्रियायाः धात्वर्थत्वेपि क्रियाजन्यफलात्माभान
विशेष्यविशेषणभावविपर्ययस्याशक्यत्वात् तस्मात्फलमात्मनेपदार्थः इत्थंचाख्यातपदोपस्थापिततया
शि·टी लाघवात् बोधे भासत इत्यर्थः । तथा च तथा विधस्येवानुभवस्तदा संख्यामात्रं तत्तीयार्थः आधेयत्वसंबंधम
३१ र्यादया भासत इति भावः । तथेति । वाक्यार्थ इत्यर्थः । तदपीति । फलमपीत्यर्थः । तथेति । वाक्यार्थसंबंध इत्यर्थः ।
भासमानत्वादिति । तथा च नामार्थधात्वर्थयोर्भेदान्वयानभ्युपगमेन कर्माख्यातस्थले फलप्रकारकबो
धानुभवापलापेन च तत्र फलस्य संबंधविधया भानासंभवादिति भावः । क्रियाजन्यफलाभावादिति । जन्य
तासंबंधेन क्रियाविशिष्टफलं तस्य धातुतो लाभादित्यर्थः । विशेषणविशेष्यभावे सादि । फलविशेष्य
कक्रियाविशेषणकबोधस्य धातुतो ज्ञाक्यत्वादित्यर्थः । एतावता प्राचीनमतं दूषयित्वा नवीन स्व
मतमुपसंहरति । तस्मादिति । इत्थं चेति । फलस्यात्मनेपदार्थत्वे चेत्यर्थः । नलभ्येतेति । तथा च कर्माख्यातस्थ
लेफलविशेष्यकजन्यतासंसर्गकक्रियाविशेषणकबोधोनुभवसिद्धः सचानुपपन्न इति भावः । भावनावि राम ३१
भावनाया क्रियाविषयिण्या फले जन्यये फलस्य क्रियाजन्यत्वं न लभ्येत भावनाविषयक्रियायाः फले

अन्वयेति। आतुपस्थापितभावनायाः क्रियाविशेषणत्वेन अन्यत्र कृप्तोऽन्वयो भज्येत. तस्मात्तत्समभिधा
यकभावकर्मकृद्योगे कृप्तशक्तेः स्फोपोल्लाभावनाया विशिष्टायाः क्रियायाः फले अन्वयः

षयस्येति। भावनाविषयीभूतायाः क्रियायाः फल इत्यर्थः। फलेऽन्वये। जन्यतासंबंधेनान्वये। अन्यत्रेति। कृ
कर्त्राख्यातस्थले कृप्त इत्यर्थः। तथा च तत्राख्यातार्थांतरवर्तमानत्वादौ धात्वर्थस्यान्वयापत्तिवारणाय धा
त्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति आख्यातपदजन्यकृदुप
स्थितेर्विषयतासंबंधेन हेतुत्वस्य कल्पनान्न धात्वर्थविशेषणत्वेन तिङर्थकृतेरन्वय इति भावः। कृत्सम
भिधायकेति। कृत्समभिधायको यो भावकर्मविहितकृत्प्रत्ययस्तत्प्रयोगे भावना कृप्तशक्ते तव्यानीयारूपकृ
य इत्यर्थः। अनुमन्तव्यादिति। चैत्रेणागन्तव्यमित्यादिभावादिविहितकृत्प्रत्ययस्थले कृप्तत्वादित्यर्थः। तथा वि
धकृत्प्रत्ययस्थले सुबर्थकृतिनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधं प्रति धातुजन्योप
स्थितेर्विशेष्यतासंबंधेन हेतुत्वकल्पनस्य कृप्तत्वात् सुबर्थकृतिप्रकारकक्रियाविशेष्यकबोधे बाधकाभाव

त्सुबर्थकृतेः क्रियाविशेषणत्वेनैवान्यस्य युक्तत्वात्

कर्तृकर्मवच्च कृतिफलयोरपि अभिधाने नियमान्नातिप्रसंगः न वा पच्यते तंडुल इत्यादयः प्रयोगाः

शि·टी· इति भावः। ननु आख्यातस्य कृतिकर्माभिधायकत्वे चैत्रेण पचति तंडुलः तंडुलं पच्यते चैत्र इत्यादिप्रयोगाप
३२ त्तिरित्यत आह। कर्तृकर्मवदिति। वैयाकरणमते यथा कर्त्राख्यातत्वं कर्तृत्वशक्ततावच्छेदकं। एवं कर्मा
ख्यातत्वं कर्मत्वशक्ततावच्छेदकं। तथा नैयायिकमतेपि कर्त्राख्यातत्वं कृतिशक्ततावच्छेदकं एवं कर्मा
ख्यातत्वं कर्मत्वशक्ततावच्छेदकमिति। उपदर्शितस्थले कृतिकर्मत्वयोर्बोधाभावान्नोपदर्शितप्रयोगा
पत्तिरिति भावः। कृतिकर्मत्वयोः शक्ततावच्छेदके कर्त्राख्यातत्वकर्माख्यातत्वे अथैते तत्रोपष्टंभकांतर
माह नवेति। तथा सति पच्यते तंडुलो मैत्रेणेत्यादिप्रयोगापत्तिरपि दुर्वारैवेति भावः। केचित्तु आख्या
तत्वमेव कृतिशक्ततावच्छेदकं लाघवात्। न चैवमुक्तप्रयोगापत्तिः कृतिविशेष्यकाख्यातपदनि राम
रूपितशक्तिज्ञाने न कर्मत्वबोधनीये चैत्रेण पच्यते तंडुल इत्यादावानुपूर्वीज्ञानस्य सहकारित्वकल्पना ३२

तिङः पश्चाप्यायाः संख्यायाः भावनायाश्च प्रथमांतपदोपस्थाप्येनैवान्वयो व्युत्पन्नः चैत्रो गंता गतो ग्रामो पित्रा

न्नोपदर्शितापत्तेरभावादिति। एवमन्यत्राप्यापत्तिर्ज्ञापकोप्यानुपूर्वीज्ञानसहकारित्वरूपमखिलधा
धोरणीभिरुपलपनीय इत्याहुः। ननु कर्माख्यातस्थले चेत् तत्फलसनामकभावनार्थत्वं तर्हि कुतो भावना
न्वयिनि संख्यान्वयनियमः। चैत्रेणापच्यते तंडुल इत्यादौ भावनानन्वयिनि तंडुले संख्यान्वयेन व्यभिचारा
त्तत्राह। तिङः पश्चाथ्याया इति। तथा च संख्यायाः प्रथमांतोपस्थाप्य एवान्वयनियमः ननु भावनान्व
यिनि तस्याः अन्वयनियम इति भावः। नन्वाख्यात तोपस्थाप्यान्वयिन्येव संख्याया अन्वयनियमः
किं नाभ्युपेयते तथा सति कर्माख्यातस्थलेनुपपत्त्यभाव इति चेन्न। तथा नियमांगीकारे नश्यती
त्यादौ वर्तमानत्वविशिष्टे संख्यान्वयप्रसंगादिति। कर्तृकर्मत्वविहिताख्यातत्वान्निसुपपाद्य कर्तृकर्म
विहितत्वलक्षणस्य पस्मत्रा किमुपपादयति। चैत्रो गत इत्यादि। अपसायताभिसतस्मकर्तृकर्मणी कृत्वाख्यातने

पक्षानिर्भूई॰ पक्षाप्रपसायन्नामित्याभेदे सामानाधिकरण्यान्वयानुपपत्त्या कर्त्तृकर्मणो कृत्वाच्ये·

शि॰टी॰ नान्वयः। कर्त्रादिविहितकृतः कर्त्राद्यवाचकत्वे चैत्रो गंता इत्यादौ समानलिंगकत्वनिर्देशानुपपत्तेः। समान
३३ लिंगकस्थले अभेदान्वयबोधस्यानुभवसिद्धतया तस्यानिर्वाहादिति भावः। ननु तादृशानुभवमानाभावक्र वे
सत आह। भोक्तादृष्यतीत्यादि। अत्र वह्नित्वस्य कर्त्राद्यवाचकत्वे भोजनानुकूलकृतिमत्प्रतीत्या
द्यन्वयबोधः स्यात्सत्त्वविशेषदर्शिनामनुपपन्नविशेषदर्शिनां तादृशवाक्याद्भोजनानुकूलकृतिमा
न्नृतप्रतीत्याद्यन्वयबोधोपपत्त्यर्थं कर्त्रादिविहितकृतः कर्त्रादिवाचकत्वमावश्यकमिति भावः। सामा
नाधिकरण्यादीति। अभेदान्वयबोधादीत्यर्थः। आदिना भोक्तात्प्रतीत्यादौ भोजनानुकूलकृतिमा
न्प्रतीत्याद्यन्वयबोधपरिग्रहः। ननु कृत्प्रत्ययस्य कर्त्रादिवाचकत्वे गंतेत्यादौ धात्वर्थान्वयानुपप राम
त्तिः। कर्त्रादेः कृत्याद्विशिष्टरूपतया कृत्यादेः पदार्थैकदेशतया तत्रानुकूलत्वादिसंबंधेन धात्वर्थगमना ३३

चैत्रस्यनप्तामैत्रादन्योघटाद्यपकृ परोपरोवाइत्यादावपिवपदार्थतावच्छेदकेनैवक्षत्यादिनाधात्वर्थान्वयः

दैरन्वयासंभवादित्यतआह। चैत्रस्यनप्तेत्यादिनाप्तृपदस्यजन्यपुरुषजन्यपुत्रपुत्रवाचकतयाजन्यत्वस्यपुरुष
पदार्थैकदेशत्वेपिस्वत्रैवचैत्रस्येति अन्तार्थस्यचैत्रसंबंधित्वस्यान्वयः। जन्यपुरुषजन्यपुरुषरूपनृ
प्तृपदार्थेचैत्रसंबंधित्वस्यान्वयेचैत्रपुत्रेपिचैत्रस्यनप्तेतिप्रयोगप्रसंगात्। तथाचतत्रयथापदार्थै
कदेशेऽन्वयस्तथाचैत्रेगतेत्यादौपदार्थैकदेशेनबोधांगीकारेपिक्षतिविरहादितिभावः। ननुजन्यपुरुष
जन्यपुरुषत्वस्यनप्तृपदशक्यतावच्छेदकत्वेविशिष्टशक्तिकल्पनेगौरवापत्तेरतआह। यज्जन्यत्वपुरुष
त्वंचेतिशक्यतावच्छेदकद्वयमेवतत्स्यसम्यक्। तथाचचैत्रस्यनप्तेत्यादौचैत्रसंबंधित्वस्यजन्यत्वेऽन्वयःजन्य
त्वस्यपुरुषेऽन्वयःपुरुषस्यजन्यत्वेऽन्वयःजन्यत्वस्यपुनःपुरुषेऽन्वयइत्येवंरीत्याचैत्रसंबंधिजन्यतानिरूप
पुरुषजन्यतानिरूपपुरुषइत्यन्वयबोधस्यविनैकदेशान्वयमुपपत्तेरुपदर्शितदृष्टान्तोसंभवउक्तिकरतिस्य

शि.टी. ३४ लांतरेतमाह। मैत्रादय इति। अयं भावः। अन्यपदस्य भेदएवत्राक्यतावच्छेदकः। ननु भेदाश्रयत्वं गौरवान्नात
थान्वयबोधानुभवाच्च। एतेनान्यपदस्यापि खंडशक्तिकल्पनेन निरस्ता। तथा च मैत्रादस्य रसादौ पंचस्पर्श
प्रतियोगिकत्वस्यान्यपदार्थैकदेशे भेदेन्वयो विनैकदेशान्वयस्वीकारमनुपपन्नः। एवं घयस्प्रागित्यादौ
रूपरसे पंचस्पर्शावधिमत्त्वस्यान्वयोपि तथा तथैव घटादपरस्य सादौ नञो विरोधिगुणवति लक्षणया पदा
र्थैकदेशे गुणे पंचस्पर्शान्वयेन घटावधिकपरत्वविरोधिगुणो वा नित्यस्यान्वयबोधोपि तथा च तेन्छिवकाय
स्य स्थलेपि एकदेशान्वयस्वीकारे बाधकाभाव इति। ननु गौर्नित्यापशुरपशुरित्यादौ नित्यत्वपशुभिन्न
त्वयोरन्वयबोधाय सा किं विपदार्थनिष्ठप्रकारता निरूपितविशेष्यतासंबंधेन पदजन्यपदार्थोपस्थिते
हेतुत्वस्याकल्पकतया चैत्रस्य न पुत्र सादौ पदार्थैकदेशे जन्मत्वे कथं चैत्रसंबंधित्वस्यान्वय इत्यत आह। न राम ३४

तच्चैवसाकांक्षत्वात्।

थैवेति। कार्यतावच्छेदकसंबंधविशेष्यतायां नत्र्पदार्थाद्यतिरिक्तवृत्तित्वनिवेशो नैवेत्सर्थः। साकांक्षत्वा
दिति। शाब्दबोधपदार्थोपस्थितेः कार्यकारणभावस्य कल्पनीयत्वादित्सर्थः। तथाचगुरुरपि तत्रस्थाका
र्यकारणभावः स्वीक्रियत इति भावः। ननु चैत्रस्य नत्रेसादौ स्वजन्मताश्रयपुरुषजन्यत्वरूपसंबंध एव
षष्ठ्यर्थः तस्यैव नत्र्पदार्थादौ जन्मपुरुषजन्यै न्वयः मतुपदार्थैकदेशे जन्मत्वे। चैत्रनिरूपितत्वरूपष
ष्ठ्यर्थसंबंधस्यान्वयः। तथा सत्तु पदद्वितकार्यकारणभावेन नत्र्पदार्थाद्यतिरिक्तवृत्तित्वस्य विशेष्य
तायां निवेशो गौरवात्। तथाच नोक्तदृष्टान्तानामवकाशः इत्सत [redacted]

शि·टी·
३५

बोधप्रसक्तिरनेकत्वान्वितचैत्रादौ कथं तिङ्प्रसङ्गात्प्राप्तिस्वाहेतुत्वयशतिवृत्तान्नाशंकनीयम्। तत्रैकत्वस्याविवक्षितत्वा-
त्वादिति। ननु तथाप्युपदर्शितयुक्त्या तिङो हि त्वाभिधायकत्वमस्तु। एकत्वाभिधायकत्वं तु तस्य निर्युक्तिक-
मित्याशंक्य मघाकर्तुमाह। लाघवादेकवचनत्वान्नहि नैवेति तथा चैकवचनत्वविशिष्टस्य सुप्त्वस्य एकत्ववा-
चकतावच्छेदकत्वमपहाय एकवचनत्व एव शक्ततावच्छेदकत्वकल्पनमुचितम्। एकवचनत्वं चाभियुक्तै-
रेकवचनत्वेन पारिभाषितत्वं। तच्च तिवादिसाधारणमिति तिवादेरप्येकत्वबोधकत्वमक्षुण्णमिति भावः।
केचित्तु पचतीत्यादावाख्यातपदाल्लक्षणयाश्रयत्वावाकर्तुर्बोधेऽपि तत्र तिङ्गत एव एकत्वबोधः स्या-
दृष्टमवसिद्धत्वादिति एकत्वबोधकत्वमावश्यकं। न च तत्रास्माकं तस्यैकत्वविशिष्टकर्तरि लक्षणेति वाच्यं। कि-
ञ्च प्रतीयमाने ह्यर्थे लक्षणाकल्पनेयते ह्यपरव्याप्तशक्तिकल्पनस्यातियुक्तिमत्त्वे लक्षणायेव तत्र

राम
३५

अत्वबोधसंभवादिसाकूं। कार्तकर्मसंख्याभिधानान्नभिधात्कर्मसांख्यास्पनाम्नीसंतमेको ग्रंथोपरिवैयाकरणाः
मन्यन्ते। क्तोत्यादि तथाचसुविभाक्तिंविनाकर्मत्वस्यख्यातस्यानासंभवात्तत्कस्यायोतरस्तुपराथसंख्याबोध
कभवेत्कर्ता: संख्याबोधकत्वेनिर्यत्तिक। नचविनिगमनाविरहइतिवाच्यं। एकवचनत्वेनसुपत्वमस्तीत्यंतत्र
प्रत्वात्। एवंचवैत्रोयामंगतवानित्यादौगमिधात्कर्तारकवृत्तयुस्यसंख्यानभिधायकत्वेनतृतीयापत्ति
स्तत्राप्यवाक्यवारणात्वादिति। ननुयत्राख्यातेनसंख्याभिधीयते तत्रप्रथमा। यत्रचैतेनकर्तृगतसंख्याना
भिधीयतेनत्रतृतीयेत्यादि नियमोवाच्यः। कर्मस्थलेचकर्त्रादिरभिधानानभिधानाभ्यांतथात्वमोबोध्यं।
तत्रक्तोपिदोषइत्यत आह। किंचेति। ननियमइति। कर्त्राख्यातेनकर्तृगतसंख्यैवाभिधीयतेननुकर्मगतसं
ख्या। एवंकर्माख्यातेनकर्मगतसंख्यैवाभिधीयतेननुकर्तृगतसंख्येतिनियमाभावइत्यर्थः। ननुस्यादसावि

त्रि·टी· प्रमालाभेकाक्षतीति आह यद्यपि कत्वावच्छेदकत्वावच्छिन्नत्वेऽपि । एकत्वमावहिन्नत्वेऽसम्बन्धः आकांक्षादिवशात्

२६ कत्वावच्छिन्नाविरूपितत्वाकिं वत्वादिसम्बन्धेन तथापि ये ये श्रोयामेन च्छिनीमत्त्वात् रव्यातेन कर्मगतत्वसत्त्वा वोधने वाधकं भा

गे ऽन्यत्वायिककर्मेरिप्रथमास्यात् एवं वैयाकरणैः प्रथमेतिद्वितीयाप्या रव्यातनकारे गतत्वसत्त्वा वोधने वाधकाभावेनत

त्वायिकर्तरिप्रथमापत्तेरिति भावः । ननु कर्त्रैकत्ववचने त्वावच्छिन्नत्वस्य कर्त्रैकत्वत्वेन शाब्दत्वावच्छेदके । एवं कर्मैकत्वव

त्वावच्छिन्नस्यकर्मैकत्वत्वेन शाब्दतावच्छेदकं वाच्यमित [redacted] आह अस्तु वेति । कस्मादित्यपेक्षितं एवेति ।

स्यानुकूलत्वमितिमूलाविरूपपरंपरा सम्बन्धप्रवेशः कर्त्रादिनासममन्वय इति । कत्वस्य यार्थकर्त्रादिः धात्वर्थगम

नादिप्रकारककोधप्रकारतावच्छेदकसम्बन्धः तथाच यथासमन्वय इति । कत्वस्य यार्थकर्त्रादि धात्वर्थगम राम

२६

'अस्तु वा कस्मादि घटितएव कर्त्रादिनासमन्वयः

मुख्यभाक्तसाधारणस्य फलादिलक्षणाकर्मत्वस्य कृत्यादिलक्षणाकर्तृत्वस्य चानभिधाने द्वितीयादयः

नादिप्रकारकबोधे प्रकारतावच्छेदकसंबंध इत्यर्थः तथा च यथा नामपदार्थे उद्दर्शितपरंपरासंबंधरूप
वक्ष्यमाणस्यैवान्वयः स्वीक्रियते। यथा चैत्रादन्य इत्यादौ स्वाश्रयभेदवत्त्वसंबंधेन भेदविशिष्टे चैत्रप्र
तियोगिकत्वस्यान्वयः। न त्वेकदेशान्वयोपि तथा गगनेत्यादावपि कर्त्रादिरूपलक्षणस्य तथार्थ एवत्वानु
कूलकृतिमत्त्वादिरूपपरंपरासंबंधेन गमनादेरन्वयो न तु पदार्थैकदेशेऽपीति भावः। ननु चैत्रेण गतो
ग्राम इत्यादौ कृत्प्रत्ययेन कर्मादिगतसंख्यानभिधानात् द्वितीयाद्यापत्तिरित्यत आह मुख्येत्यादि।
फलादीत्यादिपदेन विषयत्वादिपरिग्रहः कृत्यादीत्यादिपदेन रथो गच्छतीत्यादावाश्रयत्वादिपरि
ग्रहः। द्वितीयादय इत्यादिना तृतीयादिपरिग्रहः। अत्र चेति। चैत्रेण गतो ग्राम इत्यादौ चेत्यर्थः। विशिष्टा
भिधानमिति। कर्मत्वादिविशिष्टस्य बोधन इत्यर्थः। तथा च कृता समस्ययेन यत्र विशेषणाविभक्त्या विशेष्याभि

अत्र च कृता विशिष्टस्याभिधाने विशेषणस्यानभिधानात्

यन्तु धात्वर्थान्तरप्रत्ययत्वेनैव शक्तौ शक्तिः पाचकादिपदे तु सामानाधिकरण्यानुरोधात् विशिष्टे लक्षणेति ॥ नन्

त्रि॰ टी॰ २७ धूयावा कर्मत्वादिकं न बोध्यते तेन तत्र द्वितीयायाः पदं इति एको नियमः । एवमाख्यातेन कर्मत्वादिकं न बोध्यते तेन तत्रा
पि द्वितीया इत्यपरो नियमः स्वीक्रियते । ननु कर्मत्वादेः संख्यानाभिधानदशायां तोपि नियम इति नोक्तानु
पपत्तिरिति भावः । कस्यचिन्मतं दूषयितुमनुवदति । यत्त्विति । धात्वन्तरप्रत्ययत्वेन कृतौ शक्तिरिति धात्व
न्तरप्रत्ययत्वमेव कृतिशक्ततावच्छेदकमित्यर्थः । तथा च शक्ततावच्छेदकलाघवात् सर्वत्र कृतावेव शक्तिः
न त्वाख्यातस्य कृतौ शक्तिः कृत्प्रत्ययस्य च कर्तरि शक्तिरिति तथा सति विभिन्नशक्ततावच्छेदककल्पने
गौरवादिति भावः । ननु कृत्प्रत्ययस्य कृतिवाचकत्वे देवदत्तः पाचक इत्यादौ देवदत्तादिपदार्थे पाचका
द्यर्थस्य कथमभेदान्वयबोधस्तत्राभेदान्वयबोधस्यैवानुभवसिद्धतया प्रकारान्तरस्य वक्तुमशक्यत्वादि
त्यत आह । पाचकादिपदे त्विति । सामानाधिकरण्यानुरोधात् । अभेदान्वयबोधानुरोधात् । लक्षणेति । राम २७

भावकृतोपि वाचकतापत्तिः धातुत्वादिघटितात्तस्मादाख्यातस्यैव लघुत्वाच्च ॥

तथा च तत्र तथान्वयानुभवस्य कृतः कर्तरि लक्षणयैव निर्वाहः अलं तत्र शक्तिकल्पनयेति भावः । भावकृतोपी-
ति । आख्यातत्वावच्छेदकावच्छिन्नस्य शक्यबोधकत्वनियमादिति भावः । ननु धातूत्तरप्रत्ययस्यैव कृतिशक्ततावच्छे-
दकत्वेपि भावकृतो न कृतिबोधकत्वं तथाविधबोधे भावकृदादिभिन्नत्वानुपूर्वीविशेषस्यैव नियामकत्वा-
भ्युपगमादित्यत आह । धातुत्वादिघटितेत्यादि । आदिपदात्प्रत्ययत्वादिपरिग्रहः । तस्मात् । धातूत्तर-
प्रत्ययत्वात् । भूवाद्यन्यतमत्वविनाधातूत्तरत्वस्य प्रकारान्तरेणानिर्वक्तुमशक्यत्वात् एवं चाख्यातान्यतमत्वा
मत्त्वविनाप्रत्ययत्वस्यापीति तदपेक्षया लघुनि सम्बन्धे नाख्यातपदवत्त्वरूपाख्यातत्वस्यैव लघीयः कृति-
शक्ततावच्छेदकत्वौचित्यमिति भावः । एतेनाख्यातमात्रस्य कृतिवाचकत्वे हि प्रत्ययत्वं कर्तृशक्ततावच्छे-
दकमिति गौरवमेतदपेक्षया एकस्यैव धातूत्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वमुचितमिति सपिनि

पवपि कर्तृकृतौ पि कृतौ शक्तिः कृतिविशिष्टेतुलक्षणेति · तदप्यसत् · पत्तौ विनाभवच्छेदकं रूपं शक्यत्वासं

त्रि·टी· रंतापसयत्वस्याख्यानत्वकृत्वघटितत्वेन लाघवानवकाशादिति। कृतौ शक्तिरिति। कृतिविशिष्टे कार्त्तं कृत
३८ शक्तिकल्पने। नंतकृतौ तच्छक्यतावच्छेदकत्वकल्पने गौरवं कृतौ तत्कल्पने तु कृतित्वजातेरेव तच्छक्य
तावच्छेदकत्वकल्पने लाघवमिति तत्रैव तत्कल्पनमुचितमिति भावः। यतस्त्वादिशक्यत्वासंभवादिति त
स्य गवादिपदाना गोत्वविशिष्टे शक्यमिसनेनान्वयः। ननु गवादिपदस्य गोत्वविशिष्टे शक्तिकल्पनेप्या
न वृपकतया लाघवात्तत्रैव तत्कल्पमुचितमिति अत आह। गोत्वस्यादिनेत्यादि। गोत्वत्वस्य गवेतरासमवे
तत्वे सति गोभिन्नामोन्याभावप्रतियोगितानवच्छेदकत्वरूपतया गौरवादिति भावः। विशिष्टा तया
णामिति। शब्दविशिष्टमहत्त्वविशिष्टादीनामित्यर्थः। शक्यत्वमिति। आकाशायदमहत्सहादिशक्य
त्वमित्यर्थः। तत्रापि शब्दादिविशिष्टशक्तिकल्पनेपि अनंतशब्दादौ शक्यतावच्छेदकत्वस्वीकारे गौरवंस राम

भवात् · गोत्वत्वादिना शक्यो चास्ति गौरवात् · अस्तु वा गवादिपदानां गोत्वादिविशिष्टे शक्यं विशिष्टान ३८

केवले विशेषणे स्वारसिकप्रयोगस्तुल्य एव । एवं च गत्तोगम्यतेइत्यादौ फलस्यवर्त·ताख्यातानामेव

शक्तौ तच्छक्यत्वकल्पने तु शब्दत्वादिजातिशक्यतावच्छेदकत्वस्वीकारे लाघवमिति तत्रापि शब्दादावेव
शक्तिकल्पनं स्यादिति भावः । तुल्य एवेति । कृत्रिमस्य स्फोटेऽपि तत्र विशिष्टे इत्यर्थः । तथा च यथा शब्दादाव
काशादिपदस्य स्वारसिकप्रयोगाभावात् तत्र न तस्य शक्यत्वं तथा कृतावपि कर्तृविहितकृत्रिमस्य स्व
स्वारसिकप्रयोगाभावात् तत्रापि न तस्य शक्यत्वमिति भावः । कस्यचिन्मतं दूषयितुं दर्शयति । एवमि
त्यारभ्य केचिदित्यन्तेन । एवं । कर्मविहितकृदाख्यातयोः फलबोधकत्वव्यवस्थापने चेत्यर्थः । लाघ
वादिति । फलानुकूलत्वविशिष्टशक्तिकल्पनापेक्षया शरीरलाघवसम्भवादित्यर्थः । अनन्यलभ्यश
ति । एतेनानन्यलभ्यो हि शब्दार्थ इति नियमस्यापि न भंग इति सूचितं । व्यापारविशेषमात्रमिति । गमन
त्वादिविशिष्टमात्रमित्यर्थः । मात्रपदेन फलस्यावच्छेदः । इति स्थितावितीति इति व्यवस्थितावित्यर्थः ।

लाभात् · लाघवावतारेऽनन्यलभ्यव्यापारविशेषमात्रशक्यमिति स्थितौ

ग्रामं गच्छतिति ग्रामस्य गंतेत्यादेः फलजनकत्वलक्षणं कर्मत्वमर्थो द्वितीयादेः फले च प्रातिपदिकार्थो
विशेषणतयान्वेति॰ फलमात्रे वा प्रयोजनकत्वं तु संसर्गमर्यादया लभ्यमिति केचित्॰ तदप्यसत्॰ ग्रामं गच्छति

त्रि॰टी॰ ननु व्यापारमात्रस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ कथं कर्मत्वलाभ इत्यत आह। ग्रामं गच्छतीत्यादि। आ
३९ ख्यातकृत्तभेदेनोदाहरणद्वयं। द्वितीयादेरिति। अत्रादिना ग्रामस्य गंतेत्यादौ षष्ठ्याः परिग्रहः। फलज
नकत्वलक्षणमिति। फलत्वमत्र जन्यत्वेनेष्टव्यं। फलत्वविशिष्टजनकत्वस्य द्वितीयाद्यर्थत्वे ग्रामं ग
च्छतीत्यादौ परसमवेतधात्वर्थजन्यफलशालित्वलक्षणकर्मत्वस्य बोधप्रकारमाह। फले चेत्यादि। वै
त्रस्य न स्वेत्यादि विवेकादेशान्वयस्वीकारे तुल्यवित्तिवेद्यतया उपदर्शितकर्मत्वस्यापि बोध इति भावः।
फलजनकत्वे द्वितीयादेः शक्तिकल्पने गौरवात् तद्व्यवहायफले शक्तिः जनकत्वं तु संसर्गमर्यादया भा
सत इत्यस्यैवसम्यक्त्वात् तथैवाह। फलमात्रे वेति। जन्यत्वविशिष्टे वेत्यर्थः। फलसामान्यलाभेपीति। राम ३९
जन्यत्वविशिष्टस्यलाभेपीत्यर्थः। नियतेति। लक्षणोपस्थिति राशिक्रमाकालीनेत्यर्थः। संयोगवि
त्यजतीत्यादौ द्वितीयादितः फलसामान्यलाभेपि नियतसंयोगविभागाद्यलाभात्॰

तस्मात्फल विशेषावच्छिन्नव्यापारस्यैव धात्वर्थत्वात्· अन्यथास्त्यजिगमिप्रभृतीनां पर्यायतापत्तेः तथापि

भागाद्यलाभादिति। संयोगत्वविभागत्वादिना संयोगविभागादिरूपफलस्यालाभादित्यर्थः। तस्मादि
ति। पूर्वमतेऽपदर्शित दोषसंभवादित्यर्थः। फलविशेषावच्छिन्नेति। संयोगत्वादिविशिष्टजनक इत्यर्थः।
ननु लक्षणोपात्तछिसाद्यभावकालेऽतथाविधवोधाभावेक्षतिविरह इत्यतो दोषांतरमाह। अन्यथेति।
व्यापारमात्रस्य धातुवाच्यत्व इत्यर्थः। पर्यायतापत्तेरिति। एकशक्त्यानवच्छेदकावच्छिन्ननानापद
स्यैव पर्यायत्वात् इति भावः। ननु केनेतवापीत्यादिसंयोग त्वादिविशिष्टावच्छिन्न व्यापारस्य धातुश
क्यत्ववादिनोपीत्यर्थः। संयोगत्वालिंत्व मित्यादि। जन्यत्वरूपफलत्वावच्छिन्नस्यैव कर्माख्याता
दिवाच्यत्वेन फलात्तरस्यापि बोधसंभवादिति भावः। तदवच्छिन्नेति। संयोगत्वादिविशिष्टावच्छिन्ने
इत्यर्थः। तथा वनाहग्रामसमभिव्याहारस्यैव विशेषकार्यतावच्छेदकत्वादिति भावः। समभिव्याहार विशे ब्धृन

गम्यते ग्रामइत्यादौ संयोगशालित्वं कुतः प्रतीयत इति चेत्· तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहा

यथा इष्टसाधनताबोधकाद्विधेरेव स्वर्गकामादिसमभिव्याहारात् स्वर्गादिजनकत्वं प्रतीतिस्तु इष्टफल

शि·टी· घात सामान्यधर्मावच्छिन्नबोधकपदस्य विशेषबोधकत्वे दृष्टान्तमाह यथेत्यादि। अन्यदेतदिति। तथा च
८० तत्र यदीष्टरूपेण स्वर्गबोधकत्वं तदा ममापि फलत्वरूपेण संयोगादिबोधकत्वं। यदि वा तत्रेष्टस्वर्ग
योरभेदान्वयेन स्वर्गादिरूपफलबोधकत्वं तदा प्रकृते संयोगादिफलयोरभेदान्वयेन संयोगा
दिबोधकत्वमिति भावः। ननु सामान्यधर्मावच्छिन्नबोधकपदात् सामान्यरूपेण क्रियाया बोधसं
भव इति वाच्यं। इतं विशेषणत्वेनोपस्थितत्वान्तत्र विशेषणत्वेनान्वये निराकांक्षत्वेन तथा विशे
षबोधसंभवेपि गम्यतेत्यादाविष्टसाधने संयोगत्वादिनास्य संयोगस्य ग्रामवर्त्तितिबोधालाभप्रसंगः न च सं
योगफलयोरभेदान्वयेन संयोगत्वरूपेणान्वयासंभवादित्यत आह। अस्तु वेति। तथा च यथा बुद्धि
विशेषविषयत्वरूपसामान्यधर्मावच्छिन्नशक्तात्तदादिपदात् घटत्वपटत्वादिरूपविशेषरूपेण
योरिष्टत्वफलत्वाभ्यां स्वर्गत्वसंयोगत्वाभ्यां वेत्यन्यदेतत्। अस्तु वा बुद्धिस्थवाचकत्तदादेरेव तथा व्युत्पत्ति

बोधः तथा प्रकृतेपि फलत्वरूपसामान्यधर्मावच्छिन्नशक्तताख्यातपदात् संयोगत्वादिरूपविशेष
रूपेण बोधः। यद्धर्मावच्छिन्ने पदनिरूपितशक्तिग्रहस्तेन रूपेण पदस्य स्वरूपतो बोधजनकत्वमि
ति नियमस्य एतदतिरिक्तस्थलत्वादिति भावः। इदं घनटादि सर्वनामपदस्य शक्यतावच्छेदकं बुद्धि
विशेषविषयत्वमेव शक्तिग्रहोपि तद्धर्मावच्छिन्न एव। बोधस्तु घटोऽस्य बुद्धिस्थ इत्यादिज्ञानस
हकृतात् बुद्धिविषयत्वादिपदशक्यमितिज्ञानात् उत्पद्यते इति प्राचीनमतानुसारेण बो
ध्यं। नतु घटादिपदनिरूपितशक्तिज्ञानात् जातित्वेन घटत्वादिप्रकारकपदनिरूपितश
क्तिग्रहात् स्वरूपतो घटत्वादिप्रकारकबोधापत्तिवारणार्थं निरवच्छिन्नप्रकारतासंबंधेन शा

तत्कालिवाचकाख्यातत्वस्यापि विशेषरूपेणाबोधकत्वं। अपि च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं

त्रि·टी· स्वनिष्ठं प्रति निरवच्छिन्नप्रकारतासंबंधेनोप इति निरूपितशक्तिज्ञानहेतुत्वकल्पनस्यावश्यकतया। कथं
८१ फलत्वविशिष्टे आख्यातादिपदनिरूपितशक्तिज्ञानात् शाब्दबोधः। तदा संयोगत्वोपदर्शितसंबंधे
नोपदर्शितवारणाविरहात्। न च विषयभेदेन तादृशकार्यकारणभावकल्पने प्रकृते न स्खलेतन क
ल्प्यत इति वाच्यं। विषयभेदेन कार्यकारणभावकल्पने गौरवात्। न च तदादिपदात् विशिष्यशाब्दबो
धस्यान्यथानुपपत्त्या तथा कल्पनमावश्यकमिति वाच्यं। अनंतकार्यकारणभावकल्पनापेक्ष
या तदादिपदानां विशिष्य शक्तिकल्पनस्यैवोचितत्वात्। इति प्रकृतेपि विशिष्य शक्तेरावश्यकी
त्यभिप्रायेणाप्रकारांतरेण कर्मत्वनिर्वचनमुखेन व्यापारमात्रस्य धात्वर्थत्वे दूषणमाह। अपि गम
चेति। धात्वर्थतावच्छेदकफलेति। धात्वर्थतावच्छेदकतावच्छेदकविशिष्टफलेः स्वेष्टं गमिपतनोः कर्मत्व

स्येत्यादि। अत्र धात्वर्थगमनादिक्रियाजन्यविभागरूपस्य फलस्य पूर्वदेशेऽपि सत्वात्तद्गामिपसोः पूर्वदे
शस्यापि कर्मत्वापत्तिरेवं सजिक्रियाजन्यसंयोगरूपफलस्य उत्तरदेशेऽपि सत्वात् उत्तरदेशस्यापि सजेः
कर्मत्वापत्तिः। तथा स्यंदजन्यविभागादिजन्यफलस्य पूर्वापरदेशयोः सत्वात् स्यंदेरुभयत्र कर्मत्वा
पत्तिरतो न धात्वर्थजन्यफलशालित्वं कर्मत्वं किंतु धात्वर्थतावच्छेदकफलशालित्वं तत्ता तत्रव
नोपदर्शितानुपपत्तिः। उत्तरसंयोगरूपफलस्यैव धात्वर्थतावच्छेदकतया तस्य च पूर्वदेशेऽ
भावात्। एवमधःसंयोगस्य पतेरवच्छेदकत्वात् तस्य च पूर्वदेशेऽभावात् न गामिपसोः पूर्व
देशे कर्मत्वापत्तिः। एवं विभागस्य सजिक्रियावच्छेदकतया तस्योत्तरदेशेऽभावान्नोत्तरदे
शे सजेः कर्मत्वापत्तिः। स्यंदेश्चावच्छेदकफलाभावेन नोभयत्र कर्मत्वापत्तिरिति व्यापारमात्रस्य धा

ननु धात्वर्थजन्यफलशालित्वमात्रं गमिपच्योः कर्मत्वस्य पूर्वस्मिन्देशे त्यजेश्चोत्तरस्मिन्देशे स्पंदादेश्च

त्रि·टी· ४२ त्वप्राप्तेरप्रसंगच्छतीत्यादौ कर्मत्वबोधानुपपत्तिरेव दोष इति नु भावार्थो वसेयः। ननु तत्तद्धात्वर्थजन्यतत्तत्फल
शालित्वमित्यननुगतकर्मत्वमस्तु। अनुगतकर्मत्वनिर्वचने प्रयोजनाभावादतो ऽनुगतकर्मत्वनिर्वच
नप्रयोजनमाह। फलावच्छिन्नेति। फलजनक इत्यर्थः। सकर्मकत्वव्यवहार इति। तथाचानुगतकर्मत्वा
निर्वचने ऽनुगतकर्मत्वव्यवहारस्य विलोपप्रसंगः। नन्वेवं सति कथं जानातीत्यादौ कर्मत्वव्यवहार इ
त्यत आह। भाक्तस्त्विति। लाक्षणिक इत्यर्थः। तथाचोपदर्शितसकर्मकत्वं मुख्यसकर्मकत्वव्यवहार
नियामकमित्यतो न दोष इति भावः। ननु अननुगतमेव कर्मत्वमस्तु। अगत्या नु तद्व्यवहाराभावेष्टाप
त्तिरत आह। तादृशधातुयोग एवेति। उपदर्शितधातुयोग एवेत्यर्थः। तथाचानुगतकर्मत्वानिर्वचने स
कर्मकधातुयोगे कर्मप्रत्ययविधानस्याननुगतत्वापत्तेरिति भावः। अत्रेदमवधेयं। यद्यपि धातुत्वस्य राम ४२
पूर्वापरयोः प्रसंगात् फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारो मुख्यः भाक्तस्तु
जानात्यादेः तादृशधातुयोगे तत्र कर्मप्रत्ययात्

तत्र च द्वितीयया आधेयत्वमभिधीयते। तस्याकांक्षादिवैचित्र्यात् धात्वर्थतावच्छेदकफलेऽन्वय इति

तदर्थतावच्छेदकत्वस्य चैक्याभावेन धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वमपि नानुगतम्। एवं ता
दृशास्य कर्मकत्वविरहेऽपि जानातीत्यादौ यथा तत्र ... तु योगे कर्मविधानं तथा विशिष्य गम्यादिविधाने
ऽपि कर्मप्रत्ययविधानसंभवत्येव। तथा च तत्तद्धातुजन्यतत्तत्फलशालित्वरूपाननुगते कर्मत्वनिर्वचने
ऽपि न दोषः। कर्मप्रत्ययविधाने अनुगतत्वादातरस्य प्रकारान्तरेणापि संभवादिति व्यापारमात्रस्य धात्वर्थ
त्वे सकर्मकाकर्मकयोः पर्यायतापत्तिदोषो दुरुद्धर एवेति। ननु फलावच्छिन्नव्यापारमात्रस्य धात्वर्थत्वे ग्राममगच्छ
तीत्यादौ ग्रामादिरूपनामार्थस्य कुत्रान्वयः। न तावद्धात्वर्थैकदेशे फले। न धात्वर्थे। नामार्थधात्वर्थ
योर्भेदेनान्वयबोधानभ्युपगमात्। आह। तत्रैवेति। ग्रामं गच्छतीत्यादावेवेत्यर्थः। तत्रैवेति। द्वितीयार्थवृत्ति
त्वे चेत्यर्थः। आकांक्षादिवैचित्र्यादिति। पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तेः सकोचकल्प

अत एवं चास्याः पदार्थान्वितताधेयताबोधकसप्तमीतो भेदः अस्तु वा कर्माख्यातस्येव द्वितीयाया अपि [illegible]

त्रि·टी· ४३ द्वित्यर्थः तथा च तत्रैव ग्रामादिरूपनामार्थस्यान्वयो न तु धात्वर्थैकदेशे फले इति भावः ननु ग्रामं गच्छतीत्यादौ
कर्मकारकस्याधिकरणत्वेनान्वये कर्मणि द्वितीया चेति पृथक् सूत्रप्र[illegible]णयनमनर्थकमेव सप्तम्यधिकर
णे चेत्यत्र द्वितीया सप्तम्यधिकरणे चेति करणे नैव निर्वाहत्स्यात आह । अत एव चेति । धात्वर्थतावच्छेदकफले
द्वितीयार्थवृत्तित्वस्यान्वयादेवेत्यर्थः । तथा च सप्तम्यर्थवृत्तित्वस्य धातुशक्तिमुख्यविशेष्ये ऽन्वयः द्वि
तीयार्थवृत्तित्वस्य धात्वर्थैकदेशे फले ऽन्वय इति सूचनार्थं तत्र पृथक् सूत्रप्रणयनमिति भावः । नन्वे
हा वं सति पदार्थः प[illegible]र्थेनैवान्वेति न तु पदार्थैकदेशेन इति तादृशव्युत्पत्तेः संकोचकल्पने गौरवमिस[illegible]त आ
ह । अस्तु वेति । फलमर्थ इति तथा च फलावच्छिन्नव्यापारस्य धात्वर्थत्वेऽपि फलमेव द्वितीयार्थः । तच्च राम
जनकतासंबंधेन धात्वर्थे ऽन्वेति । आधेयत्वं तु द्वितीयार्थः फलकर्मकार[illegible]कयोः संबंधमर्यादा ४३

आस्तां वा फलव्यापारौ पृथगेव धात्वर्थौ विशिष्टस्त्वन्वयबलल्लभ्यः

याभासते। तथाच ग्रामं गच्छतीत्यादौ ग्रामवृविशिष्टसंयोगविशिष्टसंयोगानुकूलगमनानुकूलकृति
मानित्यन्वयबोध इति भावः। ननु तथाविधवाक्यजन्यज्ञाने बोधे संयोगस्य वारद्वयं भानमनुभवविरुद्ध
मित्यत आह। स्तां वेति। न चैवं गमिसञ्ज्ञोः पर्यायतापत्तिरिति वाच्यं। तत्सदृशाख्यतावच्छेदकतापक
शाख्यतावच्छेदकतावत्त्वयत्रतिष्ठतिन तत्सदृशानामेव पर्यायत्वादिति भावः। ननु फलव्यापारयोर्धा
त्वर्थत्वे तत्र कथं फलजनकव्यापारबोधनिर्वाह इत्यत आह। विशिष्टस्त्विति। जनकतासंबंधेन फलवि
शिष्टव्यापारस्त्वित्यर्थः। अन्वयबललभ्य इति। फलव्यापारयोः परस्परमन्वयाल्लभ्य इत्यर्थः। तथा च ब्यु
के त्पत्तिवैचित्र्यात् एकपदार्थयोरपि परस्परमन्वयबोधस्वीकारेऽपि तथाविशिष्टान्वयबोध इति भावः।
ननु धात्वर्थतावच्छेदकफलशालित्वरूपस्य कर्मत्वरूपत्वे भूमिं प्रयातीति विहगः इत्यादिवत् आत्मानं प्रयातीति

भूमिं प्रयाति विहगो विजहाति महीरुहं ननु त्वाम् आनमि इत्यादि प्रयोगस्यान्वयबोधनः क्रियान्वयि पर

शि॰टी॰ विहग इत्यादिप्रयोगापत्तिः। तत्र संयोगादिरूपफलस्पर्द्धिवृत्तया स्वात्मनोपि ताद्दृशफलाश्रयत्वसंभवे
४४ न स्वात्मवृत्तिताद्दृशफलानुकूलव्यापारानुकूलवृत्तिमान् विहग इत्यादिशाब्दबोधसंभवादित्यत आह।
भूमिं प्रयातीत्यादि। क्रियान्वयीति। एतेन परसमवेतत्वस्पर्द्धितीयार्थत्वे पितस्य फलेऽन्वये संयोगादिरूप
फलस्पर्द्धिवृत्तया स्वात्मवृत्तित्वेन तथाविधप्रयोगवारणासंभव इति निरस्तं। ननु परसमवेतत्वमित्यत्र
किमपेक्ष्य परत्वं विवक्षितं प्रत्ययार्थापेक्षयेति चेन्न। चैत्रेणात्मा गम्यत इति प्रयोगापत्तेः। अत्र प्रकृत्य
र्थगमनापेक्षया आत्मनः परत्वादित्यत आह। इयांस्त्विति। विशेषमेव स्फुटयति। परत्वमित्यादिना। गति
शरीरसंचारादिना कर्मणः परिग्रहः। स्वार्थेति। स्वार्थोऽत्र फलं तदाश्रयापेक्षयेत्यर्थः। इदं च फलावच्छिन्नव्यापा
रादेर्धात्वर्थपक्षे। फलव्यापारयोर्धात्वर्थत्वपक्षे तु आख्यातार्थाश्रयत्वापर्यवसितया स्वार्थाश्रयत्वाश्रयापे राम ४४

समवेतमपि कर्म प्रत्ययार्थः। अतः इयांस्तु विशेषोऽस्य परत्वं सकर्मकप्रत्ययार्थापेक्षिकं तिङन्तादिना स्वार्थफलाश्र

घटं जानातीत्यत्र उक्तिमत्त्वं कुरुते चैत्रो चैत्रेण ज्ञाप्यते इष्यते क्रियते घट इत्यादौ सविषयपदार्थाभिधायिधातु

स्थले सर्वेषामन्वयः। तथा च ग्रामं गच्छतीत्यादौ ग्रामान्यवृत्तिर्यो ग्रामवृत्तिसंयोगानुकूलस्पन्दस्तदनुकूलकृ

तिमानित्यन्वयबोधः। एवं ग्रामो गम्यते इत्यादौ ग्रामान्यवृत्तिर्यो ग्रामवृत्तिसंयोगानुकूलस्पन्दस्तज्जन्यफल

वान् तदाश्रयतावान् वा ग्राम इत्यन्वयबोध इति भावः। ननु सर्वत्र द्वितीयासमभिव्याहारस्थले फलार्थे धात्व

र्थे घटं जानातीत्यादिप्रयोगानुपपत्तिः ज्ञानजन्यफलस्य घटादावृत्तित्वेन तत्र तदभावे नान्वयबोधास

म्भवात्। एवं सर्वत्र परसमवेतत्वं कर्मप्रत्ययार्थः। इदमप्ययुक्तं। आत्मानं जानातीत्यादिप्रयोगानुपपत्तेः

आत्मान्यवृत्तित्वस्य ज्ञानादावप्रसिद्ध्या तस्य तत्रान्वयबोधासम्भवादित्यत आह घटं जानातीत्यादि।

विषयित्वमिति तु कर्तृतिङादिस्थले द्वितीयार्थाभिप्रायेण। विषयत्वमिति तु कर्माख्यातस्थले आख्या

तार्थाभिप्रायेणोक्तं। तृतीये सस्य कर्माख्यातस्थले इत्यादिः। तथा च सविषयकार्थबोधकधातुसम

भिव्याहारे कर्मप्रत्ययेन प्रत्यायमानं विषयित्वं च कर्तृतिङन्तआश्रयत्वं तृतीयया चाप्यते यत्त्वं बोध्यते

अन्वयबोधेत्वयं विशेषः यदेकत्वकर्त्र्याश्रयत्वं तत्र क्रियातत्रविषयिता तत्र विशेषणताः अन्यत्र कर्मणि

त्रि॰ टी॰ ८५ मिव्याहृतद्वितीयासमभिव्याहृतधातुस्थले फलादेर्धात्वर्थत्वनियमः। एवं तादृशधातुस्थले कर्मप्रत्य
यस्य परसमवेतत्वमर्थो नान्यत्रेति भावः। तथा सति तत्र तत्रान्वयबोधप्रकारमाह। अन्वयबोधेत्विति।
एकत्रेति। कर्त्राख्यातस्थले इत्यर्थः। अन्यत्रेति। ननु विषयत्वादेः कर्मप्रत्ययार्थत्वे ज्ञातो घट इत्यत्र वि
षयत्वस्य घटे भेदान्वयबोधसंभवः। नाम्यार्थयोर्भेदेनान्वयबोधानङ्गीकारात्। न वा भेदान्वय
बोधः बाधादित्यत आह। ज्ञात इत्यादि। तथा चाख्यातस्थले कर्मप्रत्ययस्य विषयत्वादिकमर्थः। कर्म
णि क्तप्रत्ययस्य तु विषयादिकमर्थः। तस्य च प्रथमान्तार्थेऽभेदान्वयः नामार्थयोरभेदान्वयबोधस्य
सर्वसंमतत्वादिति भावः। ननु सकर्मकसविषयकधात्वर्थे विषयितया इ तरपदार्थस्यानन्वयाङ्गीका
रेऽभुञ्जानोपि भोजनाय यतते इति प्रयोगानुपपत्तिः। न हि तत्र भोजनविषयकत्वसंभवादित्यत राम ८५
विषयता तत्र क्रियातत्राधेयत्वं तत्र कर्तेति ज्ञातो ज्ञातानि घट इत्यादौ कर्मकर्तृवृत्तिविषयाश्रयप्रतिभोजि

यतनत इत्यादौ च यत्यादिना प्रस्थिते यत्नादौ विषयत्वेनान्वयः अपि तु उद्देश्यत्वेन पदस्याभाव्यात्

आह यतत इत्यादि तथा च धात्वर्थातिरिक्तसविषयकधात्वर्थे तद्विषयत्वेनेतरपदार्थान्व
यः अत्र तु उद्देश्यत्वेनेति भावः । अत एवेति । यततेयतिपदार्थे उद्देश्यत्वेनैवेतरपदार्थान्वयो न तु विषय
त्वेन अत एवेत्यर्थः । अभुंजानोपीत्यादि । अत्र यथा तत्र तदा भोजनविषयकत्वस्याभावेन न तथा प्रयोगा
नुपपत्तिः । मंडनमतं दूषयितुं तन्मतं दर्शयति । धात्वोर्थः फलमिति । तथा च फलानुकूलव्यापारे
धातोः शक्तिवादिमते पि फले शक्तिकल्पनस्यावश्यकतया तत्रैव तत्कल्पनमुचितमिति भावः ।
नन्वेवं सति गच्छतीत्यादौ संयोगरूपफलानुकूलव्यापारबोधस्यानुभवसिद्धस्य कथं निर्वाह इत्य
त आह । अनुकूलव्यापार इति । पदार्थैकदेशेऽन्वयानंगीकारे त्वाह । व्यापारमात्रे वेति । ननु केवल
व्यापारस्य व्याप्यतार्थत्वे गच्छतीत्यादौ धात्वर्थसंयोगस्य प्रातार्थव्यापारयोः कथं जन्यजनकभाव
अत्तर भुंजानेपि भोजनाय यतत इत्यादयो प्रयोगाः फलं धात्वोरर्थः अनुकूलव्यापारे व्यापारमा

आख्यातस्य जन्यजनकभावः संसर्गमर्यादया लभ्यः लडादि तिङन्तार्थो वर्तमानत्वादिः

लाभस्तत्राह। जन्यजनकभावश्चेत्यादि। ननु सर्वत्र फलस्य धात्वर्थत्वे गच्छतीत्यत्रोत्तरदेशसंयोगः स्वर्गादि रूप
फले वर्तमानत्वेष्टसाधनत्वादेरभावात्तदन्वयानुपपत्तिरित्यत आह। लडादौ त्यादि। लडाद्यर्थः। वर्तमान
त्वादिकं। लिङाद्यर्थः इष्टसाधनत्वादिकमित्यर्थः। वर्तमानत्वादौ त्यादिना भविष्यत्वादिपरिग्रहः। इष्टसाध
नत्वादौ त्यादिना कृतिसाध्यत्वपरिग्रहः। एकपदोपात्तत्वेति। एकपदजन्योपस्थितिविषयत्वेत्यर्थः। तत्रै
वेति। व्यापार एवेत्यर्थः। तथा च व्यापारे वर्तमानत्वादेरन्वयाङ्गीकारे ऽप्यासन्नमर्थं वर्तमान
त्वादेरुपस्थितत्वात्तदर्थात्कथमिति भावः। ननु फलस्य धात्वर्थत्वे ओदनादिरूपपाकफला
नुत्पत्तिदशायां तण्डुलपाकादिरूपव्यापारसत्त्वे पाको भविष्यतीति प्रयोगापत्तिः। तत्र विरोधि
कघञ्समभिव्याहृतपचधात्वर्थे ओदनादिरूपफले वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्व राम ४६
साधनत्वादिकमेकपदोपात्तत्वप्रत्यासत्त्या तत्रैवान्वेति

भावप्रत्ययस्य घञादेः अनुकूलव्यापारमात्रमेवार्थः तेन व्यापारसत्त्वे फलानुत्पाददशायां पाकोभ

स्यमत्वादिसत आह भावप्रत्ययस्य घञादेरिति। भावविहितस्य घञादिप्रत्ययस्येत्यर्थः। अनुकूलव्यापा
र एवेति। तथा च तत्र भावविहितघञर्थस्य तादृशव्यापारस्याभिहितया तत्र वर्तमानप्रागभावप्रतियोगि
त्वरूपभविष्यत्त्वस्य बाधितत्वे च न तथा प्रयोगापत्तिसंभवादिति भावः। नेवेति। भावविहितघञ
प्रत्ययस्यानुकूलव्यापारार्थकत्वेनेत्यर्थः। फलानुत्पाददशायामिति। ओदनादिरूपफलानुत्पाद
दशायामित्यर्थः। तादृशफलोत्पाददशायां तु तत्र वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वस्यौ
दनादिरूपफले अभावेन तथाप्रयोगासंभवात्तथैवोक्तमिति। घञोऽनुकूलव्यापारार्थकत्वे यु
क्त्यंतरमाह नवेति। व्यापारविगमे। पाकादिरूपव्यापारविगमे इत्यर्थः। पाको विद्यत इति। तत्र धात्व
र्थे ओदनादिरूपफले वर्तमानकालसंबंधित्वरूपविद्यमानत्वस्य सत्त्वेन तथा प्रयोगापत्तिसंभवादि

त्यस्यतीति न प्रयोगः न वा व्यापारविगमे फलसत्त्वे पाको विद्यत इति

नापि पटभूतलयोर्विभागः संयोगवृत्तित्वं [illegible]योगगमनमित्यादिप्रयोगः प्रत्ययोपनीतपरसमवेतव्यापा

: [illegible]

शि॰ टी॰ ८७ तिभावेन भावविहितघञादीनामत्राहि परस्याह लुडुप्रत्ययस्य व्यापारार्थकत्वे युक्तिमाह नापीत्यादि
अत्र भावलुड्प्रत्ययस्य निरर्थकत्वे संयोगरूपफलमात्रस्य गमधात्वर्थत्वेन तस्य च घटभूतलोभय
वृत्तितया घटभूतलयोर्विभागो गमनमिति प्रयोगापत्तिरिति वीरिवेति तस्य व्यापारार्थकत्वमावश्यक
मिति भावः न चैतन्मते कर्मत्वेन धात्वर्थतावच्छेदकफलशालित्वं फलस्यैव तन्मते धात्वर्थतया धा
त्वर्थतावच्छेदकत्वाभावेन तद्घटलक्षणास्यासंभवदुक्तिकत्वात् नापि परसमवेतव्यापारजन्यधात्व
र्थफलशालित्वेन तत् स्वात्मानं प्रयाति विहगो हि इति प्रयोगापत्तेः विहगस्य स्वपरोयः स्वावयवः तत्समवे
तोयः स्वात्मकव्यापारः तज्जन्यधात्वर्थसंयोगात्मकफलशालित्वादिति मत आह प्रत्ययोपनीतेति प्र
त्ययोपनीतोयः परसमवेतव्यापारः तज्जन्यधात्वर्थफलतत्त्वशालित्वमेव तन्मते कर्मत्वं तादृशास्व राम ८७
रजन्यधात्वर्थफलशालित्वं च कर्मत्वं फलनिष्ठाधेयत्वं द्वितीयादिना व्यापारनिष्ठाधेयत्वं तृतीयादि
नाभिधीयते एवं च तंडुलं पचति चैत्र इत्यस्य तंडुलनिष्ठफलविशेषजनकव्यापारवांश्चैत्र इत्यर्थः मैत्रेण

व्यापारस्य प्रसयोपनीतत्वाभावेन तत्त्वात्मानं प्रयाति [redacted] विहगा इति प्रसत्यप्रसंगः । नचात्र व्यापारप
दं व्यर्थमितिवाच्यं । व्यापारत्वेन प्रसयोपनीतत्वप्राप्तये तस्योपादानात् । अन्यथा वर्तमानत्वत्वादिना
प्रसयोपनीतोयः परसमवेतकालोपाधिस्तज्जन्यधात्वर्थफलशालित्वेन स्वात्मनोपि कर्मत्वसंभवा
त्स्वात्मानं प्रयाति विहग इति प्रतीत्यापत्तेः । न च तु थापि धात्वर्थेतिव्यर्थं । गच्छती सादौ पूर्वदेशस्यापि क
र्मत्वापत्तिः । तस्यापि प्रसयोपनीतो यः परसमवेतव्यापारः तज्जन्यफलविभागशालित्वात् । त
दुपादाने च न तत्रापत्तिः । तस्य धात्वर्थत्वाभावात् । अत एव परसमवेतत्वं कर्मप्रत्ययार्थः । तस्य च
कर्त्रोपस्थापनात् तच्छले आख्यातार्थव्यापारो कर्माख्यातस्थले च निरूढप्रभृतेत तीयार्थे व्यापार एवान्व
य इति । परं तु धात्वर्थे आधेयतासंबंधेनेयदन्वेति तद्विशेष्यताधात्वर्थोधिकरणत्वसंबंधे नयत्रान्वेति

फलव्यापारयोर्विशेषण फलव्यापारयोर्विशेषणविशेष्यभावादेव कर्मप्रत्ययव्यवहारः वस्तुतस्तु

त्रि·टी· तदपेक्षया बोधांगत्वं च ग्रामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगजनकग्रामभिन्नसमवेतव्यापारवांश्चैत्रः चै
४८ त्रेण ग्रामो गम्यत इत्यत्र चैत्रवृत्तिग्रामभिन्नसमवेतव्यापारजन्यसंयोगशाली ग्राम इति बोधः। ननु कर्त्रा
व्या ख्यातकर्माख्यातयोः पा[redacted]रत्वरूपैकधर्मावच्छिन्नबोधकत्वे कथमेकत्र कर्तृप्रत्ययः। एकत्र कर्मप्रत्य
य इति व्यवहार इत्यत आह। फलव्यापारयोरिति तथा च फलस्य विशेषणत्वे व्यापारस्य विशेष्यत्वे कर्तृप्र
त्यय इति व्यवहारः एवं फलस्य विशेष्यत्वे व्यापारस्य विशेषणत्वे च कर्मप्रत्यय इति व्यवहार इति भावः
ननु कर्माख्यातस्थले धात्वर्थफलस्य साक्षान्नामार्थेऽन्वयबोधाङ्गीकारे नामार्थधात्वर्थयोः साक्षा
द्भेदान्वयबोधोऽनाङ्गीक्रियत इति व्युत्पत्तिभङ्गप्रसङ्ग इत्यत आह। वस्तुतस्त्विति। अधिकरणत्वमित्या राम
दि प्रथमान्तपदस्य पूर्वोक्तार्थ इत्यनेनान्वयः। ननु कर्माख्यातवत् कर्मकृतोऽपि आश्रयत्वबोधकत्वेन ५८

आख्यातस्येव तृतीयायाः अपि व्यापार एवार्थः कर्माख्यातस्य च धात्वर्थफलनिरूपितमधिकरणत्वं

कर्मकृतः फलाश्रयः कर्तृकृतश्च व्यापाराश्रय कर्मकर्तृसामानाधिकरण्यानुरोधात्. जानाति
स्य नामार्थे नन्वसंसर्गः नामार्थयोर्भेदेनान्वयबोधस्यानंगीकारात् इत्यत आह। कर्मकृत इति। आश्रय इ
ति। फलस्येत्यादिः। कर्तृकृतोपि यत्नाश्रयबोधकत्वे एकाकारबोधजनकत्वरक्षणार्थी आख्यातस्यापि
यत्नत्वविशिष्टशक्तत्वापत्तिरित्यत आह। कर्तृकृत इत्यादि। कर्तृकर्मेत्यादि। उपदर्शितोभयस्थ
ले कर्तृकर्मप्रत्यांसह कृतस्य धात्वर्थाभेदान्वयबोधस्यानुभवसि. द्धस्यानुरोधादित्यर्थः। जानातीत्यादि
प्रयोग इति। आख्यातकर्मकर्तृकृतोर्नाभिमतिर्विशेषः। पूर्वोक्तरीति। आश्रयत्वविषयत्वे कर्त्राख्यातकर्मा
ख्यातयोः आश्रयविषयौ च कर्तृकर्मकृतोरर्थ इत्यर्थः। मुख्यार्थ एवेत्यादि। पच्यत इत्यत्र व्यापार
स्याख्यातार्थत्वाभावात् फले वर्तमानत्वान्वयबोधांगीकारे व्यापारस्य तद्व्याख्याफलसत्त्वदशा
यामपि पच्यत इत्यादिप्रयोगापत्तिः। एवं पक्व इत्यादौ आख्यातभावेन तदर्थव्यापारे नीतत्वस्य बो
धादेः प्रयोगेषु पूर्वोक्तरीतिरनुसरणीया चैत्रेण पच्यते पक्वमित्यादौ स्वार्थे एव व्यापारे तदन्वयः

आस्तांवाव्यापाराश्रयोमुख्यो विशिष्टमन्वयबललभ्यं

त्रि·टी·
४९

धरतिवत्कुंभशाब्दत्वेन धात्वर्थफले तीतत्वस्यान्वयांगीकारेफलसत्वदशायां व्यापारनाशदशायां पक्वस्तंडुलइति
प्रयोगानुपपत्तिश्चेति भावः। वर्तमानत्वादीत्यादिना तीतत्वादिपरिग्रहः। ननु पचमानइत्यादौ शानचप्रत्ययार्थै
कदेशोव्यापार एव तदर्थवर्तमानत्वादिरन्वयः स्वीकर्तव्यः। तथाच पदार्थः पदार्थेनान्वेतीति ननु पदार्थैकदेशइति
व्युत्पत्तिभंगइत्यत आह। पचमानइत्यादि। तथाच प्रकृतस्थले तादृशव्युत्पत्तेः संकोचः कल्प्यत इति भावः। सर्व
त्र तादृशव्युत्पत्तिस्वीकारे त्वाह आस्तां वेति। नन्वेवं सति तत्र व्यापाराश्रयतायाः बोधस्यानुभवसिद्धस्य लोपप्र
संग इत्यत आह। विशिष्टमिति। आश्रयतासंबंधेन व्यापारविशिष्टाश्रयत्वमित्यर्थः। अन्वयबलभ्यमिति। एकपदोप थ
स्थापितयोरर्थयोः परस्परमन्वयबोधांगीकारेणाकांक्षाकार्यकारणभावसिद्धत्वाद्बोधविषय इत्यर्थः। तथा राम
चैकपदोपस्थाप्ययोः परस्परमन्वयबोधे बाधकाभावेन तादृशनिर्णायविशिष्टार्थबोधेनानुपपन्न इति भावः। ४९

एवकारस्यैवान्ययोगव्यवच्छेदोऽन्ययोगप्रतियोगिकव्यवच्छेदमात्रस्यातिप्रसक्तत्वात्

नन्वेकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधो व्युत्पत्तिसिद्धस्तत्र मानाभावस्तत्राह। एवकारस्येवेति। यथा
एकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधानङ्गीकारे पार्थ एव धनुर्धर इत्यादौ पार्थान्ययोगव्यवच्छेदानु
पपत्तेः। एवकारस्याप्यन्ययोगव्यवच्छेदे च प्रत्येकं शक्तिद्वयस्वीकारेण उपदर्शितानुपपत्तिनिरस्तत्वादिति भावः।
ननु एवकारस्य उभयत्र शक्तिर्न स्वीक्रियते किंत्वन्ययोगप्रतियोगिकत्वविशिष्टव्यवच्छेद एव। तथा चोपदर्शि
तान्वयबोधोऽनुपपन्न इत्यत आह। अन्ययोगेत्यादि। अन्ययोगप्रतियोगिकत्वविशिष्टव्यवच्छेदमात्रस्येत्यर्थः।
अतिप्रसक्तत्वादिति। सर्वसाधारणत्वादित्यर्थः। तथा च पार्थ एव धनुर्धर इतिवत् चैत्र एव धनुर्धर इति प्रयो
गापत्तिः। चैत्रान्ययोगघटोभयत्वव्यवच्छेदस्य चैत्रान्ययोगप्रतियोगिकस्य धनुर्धरे विद्यमानत्वादिति भावः।
नन्वन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेद एव एवकारार्थः। तथा च न चैत्र एव धनुर्धर इत्यादिप्रयो

अन्ययोगत्वावच्छिन्नप्रतियोगिकव्यवच्छेदस्यशाब्दत्वेशाब्दाप्रसिद्धिर्बाधोवा

त्रि·टी·
५०

गः। पार्थरूपधनुर्धरेचैत्रान्ययोगस्याविद्यमानतयाधनुर्धरत्वावच्छेदेनचैत्रान्ययोगत्वावच्छिन्नाभावस्यबाधितत्वात्
त्रदोषमाह। अन्ययोगत्वावच्छिन्नेत्यादि। अन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्यशाब्दत्वेऽन्यतादा
त्म्यत्वावच्छिन्नप्रतियोगिव्यवच्छेदस्यशाब्दत्वेशाब्दाप्रसिद्धिः। पार्थएवधनुर्धरइत्यादौ। अन्यतादात्म्यत्वावच्छि
न्नप्रतियोगिताकाभावरूपशाब्दाप्रसिद्धिः। पृथिव्यामेवगंधइत्यादौ। अन्यसमवेतत्वावच्छिन्नप्रतियोगिता
काभावरूपशाब्दाप्रसिद्धिदोषोनसंभवति। असमवेतेतस्यप्रसिद्धिसंभवात्। अतस्तत्रदोषमाह। बाधितत्वं
वेति। पृथिव्यामेवगंधइत्यादौगंधेऽन्यसमवेतत्वाभावस्यबाधितत्वंचेत्यर्थः। ननुतत्रगंधेऽन्यसमवेतत्वव्यव
च्छेदस्यबाधितत्वेपिपृथिव्यन्यसमवेतत्वाभावस्यतत्राबाधितत्वेननबाधसंभवात्। एवंपार्थएवधनुर्धरइत्या
दौअन्य... तादात्म्याप्रसिद्धावपिपार्थान्यतादात्म्याभावस्यप्रसिद्धिसंभवेनबाधसंभवादित्यतोदूषणांतरमाह। या
ता१

राम
५०

पार्थ एवेत्यादौ पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्याप्रत्ययप्रसंगाच्च · तस्य च तत्तोन्यत्वात्

र्थ एवेत्यादावितितस्य पार्थान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य । ततोन्यत्वात् । एवकारस्या
न्यतावच्छेदकावच्छिन्नस्यैवपरादुपस्थितिसंभवेन एवकारात् पार्थान्यतादात्म्यव्यवच्छेदस्य प्रसक्त्यासंभव
इति भावः । ननु स्वान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावादौ एवकारस्य शक्तिः कल्पनीया । तत्र स्व
पदं यत्पदसमभिव्याहृतविभक्तिसमभिव्याहृत एवकारश्रुतस्तत्परं । तथा च नोपदर्शितानुपपत्तिस्तत्रदो
षमाह । स्वामेत्यादि । स्वत्वस्याननुगमात् सर्वथैव हि साधारणानुगतस्वत्वस्याभावात् । पार्थान्यव्य
वच्छेदादौ एवकारस्य नानाशक्तिकल्पनेनावक्तव्यात् न सो । तथा चानंतशक्तिकल्पनभिया अप्रदर्शितप्रकारो
नादरणीय इति भावः । ननु एवकारस्यान्ययोगव्यवच्छेद एव नानाशक्तिवादिमते कथं पार्थ एवध
नुर्धरः इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदबोधः स्यादत आह । तस्मादित्यादि । यथा नीलो घटो नास्तीत्यादौ घट

स्यान्ययोगव्यवच्छेदत्वेन प्रागव्ययत्वे च स्वत्वस्याननुगतत्वात् शक्यानंत्यं · नीलो घटो नास्तीत्यादौ नीलघटस्याव

समानंचेऌतौकाला द्यन्वयवादिनांधात्वर्थानुकूल

त्रि॰टी॰ त्वावच्छिन्नेनीलस्यान्वयेनघटत्वावच्छिन्नाभावः प्रतीयते। तथापार्थएवेत्यादौ एवकारार्थान्यैकदेशोभेदः
५१ पार्थस्यान्वयेनासस्यवयोगे तस्यअवच्छेदे न्वयेनपार्थान्यतादात्म्यम वच्छेदः प्रतीयतइतिसमुदितार्थे
यार्थः। ननुकर्तृ कृदर्थव्यापाराश्रयैकदेशेव्यापारेवर्तमानत्वा न्वयस्वीकारेमैत्रनमनेपदार्थः पदार्थे
नान्वेतिनतुपदार्थैकदेशेनेतिव्युत्पत्तिसंकोचएवदोषः। व्यापाराश्रययोः तस्यनानाशक्यत्वेनानन्तशा
क्तिकल्पनाप्रसंगइत्यतआह। समानंचेतितथाचास्मातस्यऌतित्वेनैवलकारेशक्तिवादिनापिकर्तृकृ
दर्थकृत्याश्रयैकदेशेऌतौवर्तमानत्वादेरन्वयाभ्युपगमेउपदर्शितव्युत्पत्तिभंगः। कर्तृकृतः ऌतौ भाक्त
येवशक्तिद्वयस्वीकारेऽनंतशक्तिकल्पनाप्रसंगोवत्यमभ्युपेयोमतद्वयेपीतिभावः। ननुभाक्तोनकर्तृकृ वा राम
तोव्यापारतदाश्रययोः शक्यत्वमभ्युपगतेसंमुताहइत्यादाववपितथैवकल्प्यतयामुनधानोः कुसुमैकत्वा ५१

व्यापारविरहिण्यपि महीरुहादौ न स्पन्दते संयुक्त इत्यादिव्यवहारात् न संयोगवत्त्वमात्रप्रतीतिश्च

पत्तिः प्रत्ययोपनीतधात्वर्थानुकूलव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्र वृक्षादौ संभवादित्यत
आह। धात्वर्थेत्यादि। तथा च तत्र प्रत्ययस्य व्यापारार्थकत्वे तथाविधव्यापारविरहिणि वृक्षे तादृशाप्रत्
ययोपपत्तिरिति भावः। ननु वृक्षे दृश्यवदात्मसंयोगादिरूपव्यापारस्य तत्र वृक्षादौ सर्वदा सत्वेन तत्र तथाविध
व्यापारविरहएव॥ सिद्ध इति संयुज्यत इत्यादौ प्रत्ययस्य व्यापारार्थकत्वे नोक्तानुपपत्तिरतो हृदि रागा
त्तदाह। संयोगमात्रप्रतीतेश्च। मात्रपदेन व्यापारस्य व्यवच्छेदः। तथा सति तत्र व्यापारस्यापि बोधस्या
दिति भावः। न सकर्मकत्वमिति। व्यापारस्य प्रत्ययोपनीतत्वाभावेन प्रत्ययोपनीततादृशव्यापार
जन्यफलशालित्वरूपकर्मत्वस्य तत्र क्वाप्यभावान्न सकर्मकत्वमिति भावः। ननु घञो व्यापारार्थक
त्वे भावे घञ्सिद्धानुशासनविरोधः। तादृशानुशासनेन घञः प्रयोगसाधुत्वमात्रप्रतीतेरत आह। सं
नतत्र प्रत्ययस्य व्यापारवाचितेति। न सकर्मकत्वं· संयोग इत्यादौ धात्वर्थमात्रप्रतीतेश्च घञादेश्च प्रयोग

पचतीत्यादौ पाकानुकूलयत्नानुभवप्रसंगात्॰ फलानुकूलादृष्टवत्त्वस्यापि पचतीत्यादौ विभागानुकूल
पूर्वसंयोगादिमत्ति नि[illegible]त्वादौ [illegible] पि त्यजतीति प्रयोगप्रसंगाच्च॰ तत्र फलानुकूलत्वं तेन व्यापारविशेष

नि॰दी॰ ५२ योगद्दत्यादाविति। तथा च नादृष्टानुत्पन्नसत्त्वेस्थलाभिप्रायकमिति न दोष इति भावः। तत्रेत्यादि। तत्र लक्ष
णायां नादृष्टानुभवोपपादनेन लाघवाद्यत्नत्वमेवाख्यात[illegible]शक्यतावच्छेदकं युक्तमिति भावः। मंडन
मते दोषांतरमाह। फलेति। तथा च पाकानुकूलसाधारणव्यापाराभाववति अदृष्टादिरूपसाधारण
व्यापारवति पुरुषे पचतीत्यादिप्रयोगप्रसंगो मंडनमतेऽपीति भावः। नन्वसाधारणजनकताश्र
यव्यापारस्याख्यातार्थत्वे नोक्तदोष इत्यत आह। विभागादीति। चलतीत्यापत्तिः संभवति इत्यतीति
स्थलाद्यविस्तृतं। प्राभाकरमतमनुपपन्नत्वं तत्र दूषणमाह। तत्र तत्रेत्यादिना। तत्र तत्र। गच्छतीत्यादौ।
ततत्फलेति। संयोगविभागादिरूपसत्यर्थः। क्वचिदाश्रयत्वादिकर्मणीति। भावाख्यातस्थले आश्रयत्वादिर्भा राम
वात्क्वचिदिति। प्रसंगादिति। लक्षणादिना नादृष्टानुभवोपपादनेन लाघव[illegible] स्वेच्छाकरणीकरणी ५२

एवं धात्वर्थः सर्वत्र धात्वर्थाश्रयत्वमेव कर्तृत्वसंख्यावर्तमानत्वादिकं क्वचिदाख्यातार्थ इति
गुरुमतमपि तादृशयत्नानुभवप्रसंगादनुपादेयमिति॥ [illegible] इदं सारव्याख्यानमाहः॥ ॥

आं.ति.टी.
५३

यत्वादितिभावः॥ इतिश्रीरघु देवभट्टविरचिताख्यातवादटिप्पणीसमाप्ता॥